NṚSIṀHAMANTRARĀJAMANTRAḤ.

Begins of fol. 11 (*b*) of the manuscript described under D.No. 18049.

Complete.

Similar to the work described under D. No. 6519.

Beginning :

मन्त्रराजाय विद्महे, महामन्त्राय धीमहि, तन्नो मन्त्रः प्रचोदयात् । अस्य श्री नृसिंहमन्त्रराजमहामन्त्रस्य प्रह्लाद ऋषिः गायत्री छन्दः श्रीलक्ष्मीनृसिंहो देवता । क्षां बीजं, क्रों शक्तिः, क्ष्रौं कीलकं, श्रीलक्ष्मीनृसिंहप्रसादसिद्ध्यर्थे जपे विनियोगः ।

End :

शरीरचेष्टा मम ते प्रणामः
स्तुतिः स्ववागिन्द्रियवृत्तिरस्तु ।
सर्वा मनोरस्तुति श्रुतोमे (?)
सर्वं तवाराधनमेव भूयात् ॥

D. No. 18057

Page, 1. Lines, 6 on a page. Telugu. Slightly injured. Extent, 4 granthas.

गोपालमन्त्रः ।

GOPĀLAMANTRAḤ.

Begins on fol. 15 of the manuscript described under D. No. 18049.

Complete.

Similar to the work described under D. No. 6260.

Beginning :

अस्य श्री गोपालमन्त्रस्य नारद ऋषिः गायत्री छन्दः श्री कृष्णो देवता, जां बीजं, ह्रीं शक्तिः क्रों कीलकं, क्रामित्यादिन्यासः ।

ध्यानम्—

ध्यायेद्धरिं घननिभं जगदेकवन्द्यं
सौन्दर्यसारमरिशंखवराभयानि ।
दोर्भिदधानमजितं सरसं च वेद्मि
सत्यासमेतमखिलप्रदमिन्दिरेशम् ॥

End :

जां ह्रीं, क्रों ह्रौं हुं फट् ।

D. No. 18058.

Pages, 2. Lines, 7 on a page. Nandidnagari. Slightly injured. Extent, 18 granthas.

सूर्यकवचः ।

SŪRYAKAVACAḤ.

Begins en fol. 26 (*a*) of the manuscript described under D. No. 18049.

Complete.

Similar to the work described under D. No. 7576.

Fol. 25 contains Sandhyāvandanavidhi.

Beginning :

अस्य श्रीसूर्यकवचस्तोत्रमन्त्रस्य गिरिजा ऋषिः अनुष्टुप् छन्दः । श्री सूर्यनारायणो देवता । आदित्यः सावितुरिति बीजं, जगद्गुरुरिति शक्तिः । अरुणामिति कीलकं । मम समस्तपापक्षयार्थे सर्वशत्रुसंहरणार्थे इष्टकाम्यार्थ-सिद्ध्यर्थे जपे विनियोगः ।

End :

रक्षार्थं भयनाशाय अस्त्रशस्त्रनिवारणम् ।
सौभाग्यं धनलाभं च सर्वदुःखनिवारणम् ॥

अपस्मारं क्षयं कुष्ठं हृद्रोगभयनाशनम् ।
षण्मासं कार्यसिद्धिं च सूर्यलोके महीयते ॥

सूर्यभुक्तां प्रसन्नात्मा यः करे धारयिष्यति ।
. . . . सूर्यलोकं प्रयास्यति ॥

Colophon :

सूर्यकवचस्तोत्रं संपूर्णम् ।

D. No. 18059.

Page, 1. Lines, 6 on a page. Nandinagari. Slightly injured. Extent, 5 granthas.

महागणपतिमन्त्रः ।

MAHĀGAṆAPATIMANTRAḤ.

Begins on fol. 28 (*a*) of the manuscript described under D. No. 18049.

Complete.

Same work as that described under D. No. 6876.

D. No. 18060.

Pages, 2. Lines, 6 on a page. Nandinagari. Slightly injured. Extent, 6 granthas.

प्रत्याङ्गिरामन्त्रः ।

PRATYAṄGIRĀMANTRAḤ.

Complete.

Begins on fol. 28 (*a*) of the manuscript described under D. No. 18049.

Similar to the work described under D. No. 6656.

Fol. 28 (*b*) contains Dhanvantarimantra. Incomplete.

Beginning :

अस्य श्रीप्रत्याङ्गिरामन्त्रस्य अङ्गिरा ऋषिः । अनुष्टुप् छन्दः । प्रत्याङ्गिरा भद्रकाली देवता ॥ हूँ बीजं, फट् शक्तिः । ह्रामित्यादि न्यासः ।

End :

सहस्रभुजदण्डोद्यत्तहस्तायुधधारिणीम् ।
विभ्रतीं किङ्किणिमालां पातालतललंबिनीम् ॥
समस्तशत्रुरुधिरपानोन्मत्तां परां शिवाम् ।
परप्रयुक्तकर्मघ्नीं परराज्यप्रदायिनीम् ॥

तच्छंयोरा . . . . . । ह्रौं णां कल्पयन्तीं . . . . रयः क्रूरान्कृत्यान्वधुमिवतां ब्रह्मणां जपन्नघः प्रायः कर्तारमृच्छतु ।

D. No. 18061.

Pages, 2. Lines, 6 on a page. Nandinagari, Slightly injured. Extent, 7 granthas.

बगलामुखीमन्त्रः ।

BAGALĀMUKHĪMANTRAḤ.

Begins on fol. 15 (*a*) of the manuscript deccribed under D. No. 18049.

Complete.

Similar to the work described under D. No. 6705.

Beginning :

अस्य श्रीबगलामुखीमन्त्रस्य नारद ऋषिः जगती छन्दः । बगलामुखी देवता । ह्लां बीजं, लं शक्तिः, ममाहितानां दुष्टानां विरोधितानां, वाङ्मुखपाणिपादजिह्वाबुद्धिगतिस्तंभनार्थे जपे विनियोगः ।

End :

. ह्लीं बगलामुखीं सर्वदुष्टप्रदुष्टानां वाचामुखपाणिपादं स्तंभय, स्तंभय, जिह्वां कालय, कालय, बुद्धिं विनाशय, विनाशय, हुं फट् स्वाहा ।

D. No. 18062.

Pages, 6. Lines, 6 on a page. Nandinagari. Slightly injured. Extent, 33 granthas.

लक्ष्मीदण्डकम् ।

LAKṢMĪDAṆḌAKAM.

Begins on fol. 16 (*a*) of the manuscript described under D. No. 18049.

Complete.

Similar to to the work described under D. No. 9229.

Beginning :

जयाखिल जगद्धात्रि जय जांबूनदप्रभे ।
जय दुग्धाब्धितनये जय दन्तिद्वयाश्रिते ।
जय वरदराजदयिते
कलशपयोराशिपारिजातलते ।
श्रीकदम्बपुरवरेश्वरि
जय विजये काश्यपासमारासे ॥

जय रविकिरणावलिगुंभितोल्लासगभीरपाथःसमृद्धाभवद्भद्रपीठीभवत्पद्मवासप्रिये देवराजप्रिये ।

End :

पद्मिनि ब्रह्मविद्यात्मिके, सर्वलोकेश्वरि, त्राहि सर्वं जगद्देवि, तुभ्यं नमः ।

. . . . . गणौ . . पादो लक्ष्मीपतेर्मुदे !
इन्दिरादण्डको दण्ड्यादिन्दिरागुणमन्दिरा (?) ॥

D. No. 18063.

Pages, 3. Lines, 5 on a page. Nandinagari. Slightly injured. Extent, 17 granthas.

लक्ष्मीस्तोत्रम् ।

LAKṢMĪSTOTRAM.

Begins on fol. 19 (*a*) of the manuscript described nnder D. No. 18049.

Complete.

Similar to the work described under D. No. 673 (*g*).

Foll. 21 and 22 contain Aṣvathanārāyaṇastotra, and 23 contains Rāmabhujaṅgastotra.

Beginning :

मातर्नमामि कमले कमलायताक्षि
श्रीविष्णुहृत्कमलवासिनि विश्वमातः ।
क्षीरोदजे कमलकोमलगर्भगौरि
लक्ष्मि प्रसीद सततं नमतां शरण्ये ॥

End :

वन्दे लक्ष्मीं परशिवमयीं शुद्धजांबूनदाभां
तेजोरूपां कनकवसनां सर्वभूषोज्वलाङ्गीम् ।
बीजापूरं कनककलशं हेमपद्मे दधाना-
माद्यां शक्तिं सकलजननीं विष्णुवामाङ्कसंस्थाम् ॥

D. No. 18064.

Pages, 4. Lines, 7 on a page. Nandinagari. Slightly injured. Extent, 36 granthas.

नारायणकवचः ।

NĀRĀYAṆAKAVACAḤ

Begins on fol. 23 (*a*) of the manuscript described under D. No. 18049.

Incomplete.

Similar to the work described under D. No. 6475.

Beginning :

शृणु वक्ष्यामि सर्वेषां साधकानां महात्मनाम् ।
श्रीमदष्टाक्षराधीशकवचं पुण्यवर्धनम् ॥

सर्वदुष्टप्रशमनं सर्वशत्रुनिवारणम् ।
दारिद्र्यदोषशमनं नानाधान्याभिवृद्धिदम् ॥

सर्वरक्षाकरं दिव्यं सर्वसंपत्प्रदायकम् ।
सर्वलोकैकविजयं सर्वाभीष्टार्थसिद्धिदम् ॥

* * * * *

अस्य श्रीनारायणकवचस्तोत्रमन्त्रस्य ब्रह्मा ऋषिः । अनुष्टुप् छन्दः । अष्टाक्षराधीशः श्रीमन्नारायणो देवता । प्रणवं बीजं, नमः शक्तिः, श्रीमन्नारायणप्रीत्यर्थे विनियोगः ।

End :

भवनं पातु मे साक्षात्त्रैलोक्यग्रहनायकः ।
ग्रामं वशीकरः पातु राज्यं विश्वैकरक्षकः ॥

राष्ट्रं वश्य विभुः पातु राजानं करुणानिधिम् ।
सर्वसौभाग्यदः पातु शर्म कर्म क्रियादिकम् ।

नानाविधमहामार्गं चक्रभृत् कष्टनाशनः ।
सर्वसस्यानि मे पातु सर्वदा . . . . . . ॥

D. No. 18065.

Pages, 10. Lines, 7 on a page. Nandinagari. Slightly injured. Extent, 110 granthas.

धर्मशास्त्रवचनानि ।

DHARMAŚĀSTRAVACANĀNI.

Begins on fol. 29 (*a*) of the manuscript described under D. No. 18049.

Incomplete.

Fol. 34 contains Aṣṭākṣaramantraḥ. Incomplete.

Gives the methods adopted by each class of the people for removing certain sins or mistakes done.

Beginning :

. . . . चान्द्रायणं चरेत् ।
चतुरस्रं ब्राह्मणस्य त्रिकोणं क्षत्रियस्य च ॥

वैश्यस्य वर्तुलाकारं शूद्रस्याभ्युक्षणं स्मृतम् ।
वटकाश्वत्थपालाशपद्मानां पल्लवानि च ॥
कोविदारं कदम्बं च पात्रं कुर्यान्न भोजने ।

कदलीगर्भपात्रे च छत्राकारे च पौष्करे ।
वाल्लिपालाशपत्रे च भुक्त्वा चान्द्रायणं चरेत् ॥

*　　　*　　　*　　　*　　　*

अनभ्यासेन वेदानामाचारस्य च लङ्घनात् ।
आलस्यादन्नदोषाच्च मृत्युर्विप्रान् जिघांसति ॥

अतस्तस्य निवृत्त्या तु विशुद्धं हृदयं भवेत् ।
अभक्ष्यभक्षणाच्चित्तमशुद्धं भवति ध्रुवम् ॥
त्रिवर्षातीतधान्यानि न प्रशस्तानि वैदिके ।
तण्डुलानपि सर्वांश्च मासादूर्ध्वं विवर्जयेत् ॥

End:

तदुक्तं गर्गेण—

चान्द्रशुक्लादिदर्शान्तः सावनः त्रिंशता दिनैः ।
एकराशौ रविर्यावत् कालं मासः सभास्करः ॥
चान्द्रसावनसौराणां मासानां च प्रभेदतः ।
चान्द्रसावनसौराः स्युः स्वयं संवत्सरा अपि ।
माससंवत्सरयोश्चान्द्रादि त्रैवि . . . . ॥

D. No. 18066.

Pages, 21. Lines, 8, 9, 10 on a page. Telugu. Injured. Extent, 378 granthas.

अवधूतगीता ।

AVADHŪTAGĪTĀ.

Begins on fol. 1 (*a*) of the manuscript described under D. No. 10473.

Complete in 7 Prakaraṇas.

Fol. 11 (*b*) left blank.

Same work as that described under D. No. 4543.

D. No. 18067.

Pages, 10. Lines, 8 on a page. Grantha. Injured. Extent, 100 granthas.

अध्यात्मचिन्ता by सौम्यजामातृमुनिः ।

ADHYĀTMACINTĀ by Saumyajāmātṛmuni.

Begins on fol. 4 (*a*) of the manuscript described under D. No. 10510.

Complete.

Same work as that described under D. No. 4864.

D. No. 18068.

Pages, 2. Lines, 5 on a page. Nandinagari. Injured. Extent, 16 granthas.

पापपुरुषविसर्जनम् ।

PĀPAPURUṢAVISARJANAM.

Begins on fol. 16 (*a*) the manuscript described under D. No. 2770.

Complete.

Similar to the work described under D. No. 3675.

Beginning :

श्रीसर्वगुरुभ्यो नमः । सर्वदेवताभ्यो नमः । श्रीमदानन्दतीर्थभगवत्पादाचार्येभ्यो नमः । श्री वेदव्यासाय नमः । श्रीभारत्यै नमः । श्रीसरस्वत्यै नमः । श्रीवायवे नमः । श्रीब्रह्मणे नमः । श्रीमहालक्ष्म्यै नमः । श्रीलक्ष्मीनारायणाभ्यां नमः । इति क्रमेण द्वादशगुरून् नत्वा षट्करशुद्धिं कुर्यात् ।

मणिबन्धे प्रकोष्ठे च कूर्परे हस्तसन्धिषु ।
उभयोः पार्श्वयोः षट्करशुद्धिरितीर्यते ॥

ततो हृत्कमलेस्थितमात्मानं सुषुम्नानाडिमार्गेण मूर्ध्नि विचिन्त्य पापपुरुषं ध्यायेत् ।

ब्रह्महत्या शिरस्कं च स्वर्णस्तेये भुजद्वयम् ।
सुरापाने हृदा युक्तं गुरुतल्पे कटिद्वयम् ॥

End :

इति जपित्वा—ध्यानश्लोकः ।

ध्यायेद्धरिं मणिनिभं जगदेकवन्द्यं
सौन्दर्यसारमरिशंखवराभयानि ।
मूर्तिं दधानमचि(जि)तं सरसं च भौ
सत्यासमेतमखिलप्रदमिन्दिरेशम् ॥

D. No. 18069.

Pages, 40. Lines, 9, 10, 11 on a page. Grantha. Injured. Extent, 750 granthas.

रहस्यत्रयसारार्थसंग्रहः by वरदनाथः ।

RAHASYATRAYASĀRĀRTHASAṄGRAHAḤ by Varadanātha.

Begins on fol. 83 (*a*) of the manuscript described under D. No. 10458.

Contains the Aṣṭākṣarādhikāra, Dvayādhikāra, Caramaślokādhikāra complete.

Same work as that described under R. No. 3508.

D. No. 18070.

Pages, 23. Lines, 9 on a page. Grantha. Injured. Extent, 362 granthas.

तत्त्वत्रयचुलकम् by वरदनाथः ।

TATTVATRAYACULAKAM by Varadanātha.

Begins on fol. 103 (*b*) of the work described under D. No. 10458 wherein this work has been omitted to be mentioned in the list of other works.

Incomplete.

Contains Anātmanirūpaṇa, Jīvātmanirūpaṇa, complete and Iśvara nirūpaṇa incomplete.

A brief summary of the Tattvatrayaculaka of Vedāndeśika, which work has been described under D. No. 859 of the Tamil Descriptive Catalogue, Volume II.

Same work as that described under D. No. 4882, in the name of Cidacidīśvaratattvanirūpaṇa.

D. No. 18071.

Pages, 4. Lines, 6 on a page. Nandinagari. Injured. Extent, 18 granthas.

नारायणाष्टोत्तरशतनामस्तोत्रम् ।

NĀRAYAṆĀṢṬOTTARAŚATANĀMASTOTRAM.

Begins on fol. 6 (*a*) of the manuscript described under D.No. 10183, wherein this work has been mentioned as Dharaṇīstotra, in the list of other works.

Incomplete.

Taken from Varāhapurāṇa.

Similar to the work described under D. No. 8934.

Beginning :

अस्य श्रीधरणीस्तोत्रमन्त्रस्य यज्ञवराह ऋषिः । श्रीमधुसूदनो देवता, श्रीभूवराहप्रीत्यर्थे जपे विनियोगः ।

नारायणो नरः शौरिश्चक्रपाणिर्जनार्दनः ।
वासुदेवो जगद्योनिर्वामनो ज्ञानपञ्जरः ॥

End :

गङ्गायाः स्मरणं चैव दृढा भक्तिस्तु केशवे ।
ब्रह्मविद्याप्रबोधस्तु तस्मान्नित्यं पठेन्नरः ॥

श्रीधरणी उवाच—

एतानि तानि सर्वाणि शुभानि जगतः पतेः ।
नामान्यष्टशता . . . . . ॥

D. No. 18072.

Pages, 3. Lines, 5 on a page. Nandinagari. Injured. Extent, 9 granthas.

मध्वगुरुचरमश्लोकाः ।

MADHVAGURUCARAMAŚLOKĀḤ.

Begins on fol. 8 (a) of the manuscript described under D. No. 10183.

Complete.

Ślokas giving the dates of the important Ācāryas of Madhvas.

Beginning :

नवमी माघमासस्य शुक्ला नन्दमुनेर्दिनम् ।
कार्तिके पद्मनाभस्य मुनेः कृष्णचतुर्दशी ॥
ततो नर(नृ)हरितीर्थानां पौषे कृष्णा च सप्तमी ।
उक्ता माधवतीर्थानाममाभाद्रपदस्य च ॥

End :

श्रावण्यां कृष्णद्वितीयायां राघवेन्द्रमुनीश्वरः ।
माघे शुक्लदशम्यां तु योगीन्द्रः स्वर्गतो गुरुः ॥

D. No. 18073.

Palm leaf. 15¼ × 1¼ inches. Pages, 230. Lines, 6, 7 on a page. Grantha. Injured. Extent, 2,070 granthas.

प्रपत्तिपरिशीलनम् ।

PRAPATTIPARIŚĪLANAM.

Complete.

Explains the necessity for doing Prapatti and the ways of doing it or the ways of washing off ones sins and attaining eternal Bliss.

Beginning :

पेशीं पाशा त्वया विद्या मायादासी हृयेश्वरी ।
विद्याक्लेशात्मिकां देवीं नौम्यपीतस्तनीमहम् ॥

अत्र तावदशेषविशिष्टविप्रकुल . . . . त्परगतिपरमप्रयोजनप्रपत्ति-प्रकरणं करिष्यमाणास्तत्कृतिपरिकात्मत्वेष्टदेवतामनुसन्दधते अविकारेति ।

अविकारितत्वमखिलार्थकारणं
कमलालयं तु निजतत्वतो हृदा ।
अवलोकयेत् प्रपदनं प्रकाश्यते
परमापवर्गफलमुत्तमात्मनाम् ॥

अविकारं स्वतः सदाचित्स्वरूपजडमयाशेषनामरूपविकारप्रपञ्चातीतं तत्त्वं त्रिकालैकरूपसत्पूर्णचित्प्रकाशात्मकं आदिगुरुश्रीमदादिब्रह्मतत्त्वं तथा—

* * * * *

ये हि प्रसिद्धवैभवा यतिशेखराः भगवदानन्दयोगिनो निजाचार्याः साक्षाद-परोक्षनिजदिव्यमङ्गलविग्रहाः सन्तः साक्षात्परिकरसमग्रब्रह्मतत्वावद्योतकं सूत्रं . . . सूत्रोपनिषदं ब्रह्म च सामान्यतोऽशेषवेदान्तकदम्बकं, ...

* * * * *

तानेतान् श्रीमत्प्रपत्तिब्रह्मविद्या तदर्थात्मकादिगुरून् ब्रह्ममूर्तीन् अस्मदा-चार्यान् प्रपद्य । श्रीमत्प्रपत्तिरहस्येनेति शेषः ।

* * * * *

तथा हि—चातुर्वर्ण्यं मया सृष्टं गुणकर्मविभागशः । इति ॥

तथा—महर्षयः सप्त पूर्वे चत्वारो मनवस्तथा ।
मद्भावा मानसा जाता . . . . . . इति ॥

तथा—इमं विवस्वते योगं प्रोक्तवानहमव्ययम् । इति ।

* * * * *

अथाश्रमविशेषनिबन्धनकुलमन्त्रविशेषोपदेशपूर्वं ब्रह्मकुलस्य कुलदेवता-भेदोपदेशपूर्वं प्रकरणमुपसंह्रियते ।

End :

सर्वस्मिन् कालेऽपि ब्रह्मकुलस्य स्वकुलपरमापवर्गपदशाश्वतब्रह्मलोकावाप्तये निजकुलदैवतम . . . तुर्यश्रीमदादिगुरुं परब्रह्मैव समुपास्यमित्येवं प्रकारेण सर्वं ब्रह्मकुलस्य स्वकुललोकप्राप्त्यु . . . श्य सर्वमुपदिष्टं, न किञ्चिदप्यतः परं निजकुलपरगतय उपदेश्यमवशेषितमस्ति ।

परिशीलय . . . . शीलिनीमिमा-
मरुणाचलेश कृपया प्रवर्तिताम् ।
अमलप्रपत्तिपदवीप्रदर्शिका-
ममलात्मलोकगतये द्विजोत्तमाः ॥

. . . . . निहित निखिलैश्वर्यदिव्यानन्दभोगश्रीमदरुणाचलेश्वरस्य जगदनुग्रहाय निजदिव्यवैभवप्रचिकाशिषालक्षणया . . . . ।

D. No. 18074.

Pages, 9. Lines, 3 on a page. Grantha. Injured. Extent, 22 granthas.

वरमङ्गलाष्टकम् by कालिदासः ।

VARAMAṄGALĀṢṬAKAM by Kālidāsa.

Begins on fol. 6 (*a*) of the manuscript described under D. No. 9906.

Complete.

Eight stanzas said to have been composed by Kālidāsa.

Same work as that described under D. No. 11333 with slight different readings in the end as given below.

End :

इत्येवं वरमङ्गलाष्टकमिदं पापौघविध्वंसनं
पुण्यं संप्रति कालिदासकविना विप्रप्रबोधीकृतम् ।
यः प्रातः शृणुयात्पठेदनुदिनं निर्व्याजभक्त्यान्वितो
गङ्गासागरसंगमादवभृथं प्राप्नोति पुण्यं महत् ॥

D. No. 18075.

Palm leaf. $10\frac{1}{2} \times 1\frac{3}{16}$ inches. Pages, 12. Lines, 5 on a page. Telugu. Good Old. Extent, 60 granthas.

शिवकेशवसाम्यभङ्गशतकम् by हरदत्ताचार्य ।

ŚIVAKEŚAVASĀMYABHAṄGAŚATAKAM by Haradattācārya.

Incomplete.

Contains 51 stanzas only.

Similar to the work described under D. No. 5121.

This work is also called Hāriharatāratamyastavaḥ.

Beginning :

एकः स्वनेत्रकमलार्पणलब्धचक्र-
स्त्वन्यः स्वपादजनितं प्रददौ च तस्मै ।
को वानयोरधिक इत्यनुचिन्त्य वृद्धाः
सत्यं वदन्तु तमिमं वयमाश्रयामः ॥

एकस्त्वनीशसवनेश्वरतां प्रयात-
स्त्वन्यस्तदक्षममुना क्रतुमा(म)र्दे ।
को वानयोराधिक इत्यनुचिन्त्य वृद्धाः
सत्यं वदन्तु तमिमं वयमाश्रयामः ॥

End :

एकः पयोधिरमृते धुरमन्धददा
ह(ह्य)न्यस्तदुद्भवविषं च पपावनाशः (?) ।
को वानयोरधिक इत्यनुचिन्त्य वृद्धाः
सत्यं वदन्तु तमिमं वयमाश्रयामः ॥

एकस्त्वकार इति वर्णविदां वचः स्या-
दोङ्कार अन्य इति च प्रभुराम्निविष्टः ।
को वानयोराधिक इत्यनुचिन्त्य वृद्धाः
सत्यं वदन्तु तमिमं वयमाश्रयामः ॥

Colophon :

इति हरदत्ताचार्यविरचितं शिवकेशवसाम्यभङ्गशतकं संपूर्णम् ।

D. No. 18076.

Pages, 13. Lines, 13, 14 on a page. Telugu. Good. Extent, 210 granthas.

गणपतिमन्त्रहोमप्रयोगः ।

GAṆAPATIMANTRAHOMAPRAYOGAḤ.

Begins on fol. 1 (*a*) of the manuscript described under D. No. 4365.

Incomplete. Gives the method of worshipping Lord Gaṇapati with homas, etc., to attain certain desired results.

Beginning :

वैदिकाचमनं त्रिरावृत्तिः देवताचमनं त्रिरावृत्तिः । ओं भूः प्राणायामं त्रिरावृत्तिः । मनोऽभीष्टसंकल्पं देवताकर्षणं सुं हास्ति, स्वाहा, एहि, एहि, आगच्छ आगच्छ, मां मां रक्ष, मनोभीष्टं, शीघ्रमेव प्रयच्छ, कुरु कुरु स्वाहा, ओं भूर्भुवःस्वः । अपवित्रः, चिः देवताशुचिः ।

End :

रुद्राय___कद्रुद्राय प्र+हवे स्वाहा रुद्रायानाज्ञातादि यदस्य कर्मणो त्यरीरिचं यद्वा न्यूनमि + + करोतु स्वाहा, स्विष्टकृत इदं, भूरादि चतुराहुतीः । यज्ञेश्वरपूजा पञ्चगव्यपूजा अनुज्ञा, प्राशनम् ।

D. No. 18077.

Pages, 5. Lines, 5, 6 on a page. Granthas. Slightly injured. Extent, 20 granthas.

ब्रह्मसूत्रम् by व्यासः ।

BRAHMASŪTRAM by Vyāsaḥ.

Begins on fol. 37 (*a*) of the manuscript described under D. No. 5218.

Incomplete.

Contains first two Pādās of the 1st Adhyāya only.

Same work as that described under D. No. 4649.

D. No. 18078.

Pages, 6. Lines, 6 on a page. Granthas. Slightly injured. Extent, 32 granthas.

पाद्मसंहिता ।

PĀDMASAṀHITĀ.

Begins on fol. 40 (*a*) of the manuscript described under D. No. 5218.

Incomplete.

Contains 1st Adhyāya only.

Similar to the work described under D. No. 5296.

Beginning :

आचार्यो यजमानश्च दैवज्ञेन शुभे दिने ।
ग्रामादिस्थापनायादौ निमित्तानि परीक्षयेत् ॥
शुभे निमित्ते ग्रामादीनारभेत विचक्षणः ॥
भूपरीक्षादिकं सर्वं रथकारेण वै सह ।
आचार्यः पाञ्चरात्रज्ञः कुर्यादभ्युदयोद्यतः ।
सपद्मा भद्रका पूर्णा धूम्रा चेति चतुर्विधा ॥

End :

कृत्वा बलिं यथाशास्त्रं सूत्राण्यपि च पातयेत् ।
शङ्कुं संस्थापयेत्तत्र सूत्रसन्धिषु सर्वतः ॥
अधोमुखं प्राक्शिरसं विन्यसेद्वास्तुपूरुषम् ।
प्रसार्य पाणी पादौ द्वौ कोणभूमिषु कल्पितम् ॥
एवं ध्यात्वा समभ्यर्च्य पुरुषं वास्तुकल्पितम् ।

Colophon ;

इति पाद्मसंहितायां ग्रामस्वीकारे प्रथमोऽध्यायः ॥

D. No. 18079.

Pages, 8. Lines, 7 on a page. Good. Extent, 48 granthas.

सनत्कुमारवास्तुशास्त्रम् ।

SANATKUMĀRAVĀSTUŚĀSTRAM.

Begins on fol. 49 (*a*) of the manuscript described under D. No. 5218.

Same work as that described under D. No. 13064 but with slight different readings. There are some Tamil notes also for same verses here.

Incomplete.

Contains up to grahagrāmavāstuvidhi.

D. No. 18080.

Pages, 5. Lines, 7 on a page. Grantha. Slightly injured. Extent, 28 granthas.

ग्रामशान्तिः ।

GRĀMAŚĀNTIḤ.

Begins on fol. 63 (*a*) of the manuscript described under D. No. 5218.

Similar to the work described under D. No. 3617.

Complete.

Beginning :

ग्रामशान्तिमथो वक्ष्ये यथावच्छृणु नारद ।
चण्डालदूषिते वापि गोब्राह्मणहतेऽपि वा ।
दिवा वा यदि वा रात्रौ शिवाद्यैर्घोषितेऽपि वा ॥
दिवाभीतादिशकुनैर्दूषितेऽशनिपातने ।
संघातमरणे वापि महामानिप्रकोपने ॥
ग्रामवृद्धिकरीं शान्तिं नृपराष्ट्रसमृद्धिदाम् ।

End :

एवं कृत्वा विधानेन सर्वशान्तिर्भविष्यति ।
रोगोपद्रवदुःखादि भूतग्रहनिपीडनम् ॥
यक्षराक्षसनागादिभयं तत्र न विद्यते ।
न च बालाः प्रमीयन्ते न तस्करभयं तथा ॥
प्रतिसंवत्सरं कुर्यात् पुत्रपौत्राभिवृद्धिदम् ।
धनधान्यसमृद्धाश्च सर्वोपद्रववर्जिताः ।
जीवन्ति शतवर्षाणि सर्वपापैः प्रमुच्यते ॥

Colophon :

इति ऋषिपुत्रसंहितायां ग्रामशान्तिः समाप्ता ।

Fol. 55 contains Vāstuhomavidhi.

D. No. 18081.

Pages, 5. Lines, 6 on a page. Grantha. Slightly injured. Extent, 24 granthas.

ज्योतिषविषयः ।

JYOTIṢAVIṢAYAḤ.

Begins on fol. 56 (*a*) of the manuscript described under D. No. 5218.

Complete.

Deals about the Astrological matters, gives the effect of the various planets being in different or various places.

Beginning :

अथ वक्ष्ये गृहारंभे त्वायुर्योगविवृद्धये ।
व्योमपाताल ो चन्द्रे गुरुलाभे कुजार्कजौ ॥

यस्य तस्य समाशीतियुता लक्ष्मीयुता स्थितिः ।
गुरौ लग्नेऽस्तगे सौम्ये शौर्ये मन्दे रिपौ रवौ ।

जले शुक्रे समारब्धं जीवेद्वर्षशतं गृहम ।
भृगौ लग्ने बुधे स्वस्थे गुरौ केन्द्रभेव रवौ ॥

अस्मिन् योगे समारब्धं जीवेद्वर्षशतं गृहम् ।

End :

आश्लेषे मृगशीर्षे च गुरुणा संयुते सति ।
गुरुवारे कृतं वेश्म राजयोगमिहोच्यते ॥

तद्गृहे पुत्रलाभः स्यात् स च राज्याधिपो भवेत् ॥

जलराशिगते शुक्रे शुक्रवारे स्वलग्नके ।
तृणेनाध्यासितं वेश्म वह्निनापि न बाध्यते ॥

जलराशिगते चन्द्रे चन्द्रवारे विधूदये ।
तृणेनाच्छादितं वेश्म वह्निनापि न बाध्यते ॥

D. No. 18082.

Pages, 3. Lines, 6, 7 on a page. Grantha. Injured. Extent, 24 granthas.

शूद्रपञ्चसंस्कारः ।

ŚŪDRAPAÑCASAMSKĀRAḤ.

Begins on fol. 60 (*a*) of the manuscript described under D. No. 5218.

Complete.

Beginning :

श्रीवैष्णवेभ्यः सदसि स्थितेभ्यो
नमोऽस्तु गुर्वाश्रयणोन्मुखानाम् ।
तापादिकं कर्म करिष्यमाणं
शुभावहं चास्तु भवत्प्रसादात् ॥

इत्यनुज्ञाप्य-पुण्याहवाचनं-तण्डुलोपरि कूर्चनारिकेलसहितसूत्रवस्त्रवेष्टित-कुंभे संकल्पपूर्वक . . . . दधि मावाह्य तत्र शेष . . केशवमावाह्य, गङ्गां यमुनां गोदावरीं.

End :

इन्द्रकोपकसंकाशः पाशहस्तोऽपराजितः ।
सबाह्याभ्यन्तरं देहं व्याप्य दामोदरः स्थितः ॥
एवं सर्वत्र तच्छिद्रं नामद्वादशपञ्जरम् ॥
प्रविष्टोऽहं न मे किञ्चिद्भयमस्ति कदाचन ।
भयं नास्ति कदाचिद्रोन्नम इति ॥

D. No. 18083.

Palm leaf. 15 × 1¼ inches. Pages, 14. Lines, 8 on a page. Grantha. Slightly injured. Old. Extent, 180 granthas.

सामान्यनिरुक्तिः ।

SĀMĀNYANIRUKTIḤ.

Incomplete.

Contains a portion of Sāmānyaniruktiprathama lakṣaṇa.

A Treatise on logic.

Beginning :

हेत्वाभासनिरूपणे प्रसङ्गस्यापि संगतित्वं संभवति । व्याप्तिपक्ष-धर्मताविशिष्टहेतुनिरूपणे व्याप्तिपक्षधर्मताविरोधितद्विरहवतो दुष्टहेतोः स्मरणात् । अतस्तन्मूलस्य न्यूनतां परिजिहीर्षुः प्रसङ्गस्यापि निरूपणप्रयो-जकत्वमाह—एतावतेति । परिकरो व्याप्तिपक्षधर्मे ते निरूप्येत्यन्त-मुक्तक्रमेण दुष्टहेतोः स्मृतत्वस्य प्रसङ्गसंगतिनिर्वाहकस्य लाभाय तत्प्रसङ्गा-दिति तत्परिकरहेतुनिरूपितप्रसङ्गसंगतेरित्यर्थः ।

End :

एवं च तादृशसंबन्धेनाभावांशे साध्यतावच्छेदकप्रकारकव्यभिचारज्ञानस्य व्याप्तिग्रहविरोधित्वात्ः प्रसिद्धेन तादृशसंबन्धेन प्रमेयत्वत्वादेरभावांशे भ्रमात्मक एव तादृशग्रहो विवक्षित इति न किञ्चिदनुपपन्नम् ।

D. No. 18084.

Pages, 4. Lines, 4, 5 on a page. Telugu. Injured. Extent, 24 granthas.

उत्तरसन्ध्यामृत्युलाङ्गूलस्तोत्रम् ।

UTTARASANDHYĀMṚTYULĀṄGŪLASTOTRAM.

Begins on fol. 69 (*a*) of the manuscript described under D. No. 29. Similar to the work described under D. No. 6955.

Beginning :

अस्य श्री उत्तरसन्ध्यामृत्युलाङ्गूलस्तोत्रमहामन्त्रस्य यम ऋषिः गायत्री छन्दः कालाग्निरुद्रो देवता । क्लां बीजं, क्लीं शक्तिः, क्लूं कीलकं, मम मृत्युस्तोत्रजपे विनियोगः

End :

श्वित्री कुष्ठी, कुनखी भगवते दीयमानं, न गृह्णीयात् ः अन्धो भवति ब्रह्मणस्सायुज्यं गच्छति एवा . . . मा प्रमुच्यते . दं मन्त्रो नश्यति मन्त्रः इत्याह भगवान् महादेवो वसिष्ठः । ओं आभिर्गीर्भिर्यदतो न ऊनमाप्यायय हरितो वर्धमान माशिते ओं शान्तिश्शान्तिः,

इत्युत्तरसन्ध्यामृत्युलाङ्गूलस्तोत्रं सम्पूर्णम् ।
मृत्युपस्थाने शान्तिरस्तु ।

D. No. 18085.

Pages, 10. Lines, 4 on a page. Telugu. Injured. Extent, 10 granthas.

शुद्धशक्तिखड्गमालास्तोत्रम् ।

ŚUDDKAŚAKTIKHAḌGAMĀLĀSTOTRAM.

Begins on fol. 90 (*a*) of the manuscript described under D. No. 29. Complete.

Similar to the work described under D. No. 7416.

Beginning :

अस्य श्रीशुद्धशक्तिखड्गमालास्तोत्रमहामन्त्रस्य उपस्थेन्द्रियाधिष्ठान-वरुणादित्य ऋषिः, गायत्री छन्दः, सात्त्विककाकारिकपीठस्थितकामेश्वराङ्क-निलयकामेश्वरीललिताभट्टारिकामहात्रिपुरसुन्दरी देवता । ऐं बीजं, क्लीं शक्तिः, सौः कीलकं, मम खड्गसिद्ध्यर्थे जपे विनियोगः ।

End :

महामहाशक्ते, महामहागुप्ते, महामहाज्ञप्ते, महामहास्कन्दे, महामहाशये, महामहाश्रीचक्रनगरसाम्राज्ये नमस्ते नमस्ते स्वाहा ।

D. No. 18086.

Pages, 3. Lines, 8 on a page. Grantha. Slightly injured. Extent, 20 granthas.

सप्तश्लोकीरामायणम् ।

SAPTAŚLOKĪRĀMĀYAṆAM.

Begins on fol. 9 (*a*) of the manuscript described under D. No. 7536.

Complete.

But wants the Introductory stanzas in the beginning.

Same work as that described under R. No. 1419 (*a*).

D. No. 18087.

Pages, 2. Lines, 8 on a page. Slightly injured. Extent, 10 granthas.

महापुरुषचरणारविन्दस्तोत्रम् ।

MAHĀPURUṢACARAṆĀRAVINDASTOTRAM.

Begins on fol. 13 (*a*) of the manuscript described under D. No. 7536.

Similar to the work described under D. No. 10187.

Complete.

Beginning :

ध्येयं सदा परिभवघ्नमभीष्टदोहं
तीर्थास्पदं शिवविरिञ्चिनुतं शरण्यम् ।
भृत्यार्तिहं प्रणतपालभवाब्धिपोतं
वन्दे महापुरुष ते चरणारविन्दम् ॥

यत्पादपङ्कजरजः शिरसा बिभर्ति
श्रीरब्जजः सगिरिशः सह लोकपालैः ।
लीलातनुस्स्वकृतसेतुपरीप्सया यः
काले दधत्स भगवन् मम केन तुष्येत् ॥

End :

मुरलिनिनदलोलं मुग्धमायूरचूडं
दलितदनुजजालं धन्यसौजन्यशीलम् ।
. . . नवहेलं पद्मसद्मानुकूलं
नवजलधरनीलं नौमि गोपालबालम् ॥

D. No. 18088.

Pages, 2. Lines, 8 on a page. Grantha. Slightly injured. Extent, 8 granthas.

द्वादशनामस्तोत्रम् ।

DVĀDAŚANĀMASTOTRAM.

Begins on fol. 13 (*b*) of the manuscript described under D. No. 7536.

By reciting Dvadaśanāmastostra especially on Newmoon and Fullmoon days, etc. one can wash off all his sins.

Complete.

Beginning :

किं तैर्नामसहस्रैस्तु विज्ञातैस्तु तवार्जुन ।
तानि नामानि वक्ष्यामि यैस्तु पापैः प्रमुच्यते ॥

प्रथमं तु हरिं विद्यात् द्वितीयं केशवं तथा ।
तृतीयं पद्मनाभं च चतुर्थं वामनं तथा ।

End :

सायं प्रातः पठेद्यस्तु सर्वपापक्षयो भवेत् ।
चान्द्रायणसहस्रस्य कन्यादानशतस्य च ।
अश्वमेधसहस्रस्य फलं प्राप्नोति मानवः ॥
पौर्णमास्याममावास्यां द्वादश्यां तु विशेषतः ।

Colophon :

इति कृष्णार्जुनसंवादे द्वादशनामस्तोत्रं संपूर्णम् ।

D. No. 18089.

Pages, 2. Lines, 7 on a page. Grantha. Slightly injured. Extent, 12 granthas.

देवीमालामन्त्रः ।

DEVĪMĀLĀMANTRAḤ.

Begins on fol. 40 (*a*) of the manuscript described under D. No. 9123.

Complete.

Similar to the work described under D. No. 6422.

Beginning :

ओं नमो भगवति, पराशक्ति परमाक्षरि, चामुण्डि कवाछिनि श्मशानपरब्रह्मणि अट्टहासिनि ओड्याणपीठप्रसदिनि, एह्येहि, पीठे महापीठे श्री ह्रीं, क्लीं,

End :

एकाहिकद्व्याहिकत्र्याहिकचतुर्थाहिकसर्वोपद्रवान्वदिवध निर्जय कुरु मां रक्ष मम दुरितमवमोचय हुं फट् (स्वा) स्वाहा ।

D. No. 18090.

Pages, 11. Lines, 6 on a page. Telugu. Slightly injured. Extent, 125 granthas.

भगवद्गीतासारः ।

BHAGAVADGĪTĀSĀRAḤ.

Begins on fol. 7 (*a*) of the manuscript described under D. No. 2375.

Complete.

Similar to the work described under D. No. 14888.

Beginning :

अस्य श्रीगीताशास्त्रमहामन्त्रस्य ब्रह्मविष्णुमहेश्वरा ऋषयः । गायत्री छन्दः । आहवनीयगार्हपत्यदक्षिणाग्रयः स्थानानि, ऋग्यजुस्सामानि नीलपीतश्वेतवर्णानि, आकाशं, बीजं, आकारः शक्तिः, मकार इति कीलकं, प्रणवादिसंपुटं श्रीमहाविष्णुप्रीत्यर्थे जपे विनियोगः ।

इदमस्य परं भूयः शृणु गुह्यं सनातनम् ।
सर्वेष्टदं च वेदेषु पुराणेषु च कृत्स्नशः ॥

End :

सकृद्गीताम्भसि स्नानं संसारमलनाशनम् ।
गीतायाः श्लोकपादेन गोविन्देति च कीर्तनात् ॥

इति दर्शनमात्रेण कोटितीर्थफलं लभेत् ॥

Colophon :

ओं तत्सदिति महाभारते शतसहस्रिकायां संहितायां वैयासिक्या श्रीभीष्मपर्वणि श्रीमदुत्तरगीतासु उपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे गीतासारो नाम द्वाविंशोऽध्यायः ।

D. No. 18091.

Pages, 6. Lines, 7 on a page. Telugu. Slightly injured. Extent. 66 granthas.

भगवद्गीतामाहात्म्यम् ।

BHAGAVADGĪTĀMĀHĀTMYAM.

Begins on fol. 12 (*a*) of the manuscript described under D. No. 2375.

Complete.

Same work as that described under D. No. 2486, but with different Colophon.

Colophon :

ओं तत्सदिति श्रीमन्महाभारते शतसहस्रिकायां संहितायां वैयासिक्यां, श्रीभीष्मपर्वणि गीतामाहात्म्यं नाम त्रयोविंशोऽध्याय ।

D. No. 18092.

Pages, 4. Lines, 6 on a page. Telugu. Slightly injured. Extent, 38 granthas.

शिवलीलासंग्रहः ।

ŚIVALĪLĀSAṄGRAHḤ.

Begins on fol. 15 (*a*) of the manuscript described under D. No 2375.

Complete.

Describes the Siva leelas which dash off ones sins.

Beginning :

प्रथमा प्रथिता लीला वृत्रारेर्वृजिनापहा ।
द्वितीया सा मुनेश्शापान्मुनेरैरावतस्य च ॥

तृतीया सा नीपवन्यामकरोन्मधुरापुरीम् ।

End :

एवं चतुष्षष्टिविधा लीला नीपाटवीपतेः ।
शृण्वन्तश्च गृणन्तश्च लभन्ते सकलेप्सितम् ॥

संग्रहश्लोकमात्रं ये लीलानां कालवैरिणः ।
भक्त्या कुर्वन्ति यत्कार्यं तस्य सिद्धिं प्रयान्ति ते ॥

D. No. 18093.

Pages, 2. Lines, 5, 6 on a page. Grantha. Slightly injured. Extent, 4 granthas.

ज्योतिषविषयः ।

JYOTIṢAVIṢAYAḤ.

Begins on fol. 27 (*a*) of the manuscript described under D. No. 2829.

Incomplete.

Fol. 27 (*b*) to 38 contain some Dharmaśāstravacanāni.

Beginning and end :

शतमखेन्दुहुताशनराक्षसान्
यमजलेशसमीरणशूलिनः ।
दिवि भुवि क्रमतः परिचक्षते
सिततिथिप्रथमादिषु योगिनी ॥

पञ्चकशुद्धिपरिज्ञानम्—

तिथिरुडुदिनलग्ने योजितं पञ्चधा कृत
तिथिरविदशनागैर्वेदसंख्यायुतं यत् ।
नवहृतशरशेषं शोभनं वर्जनीयं
रुगनलनृपचौरर्मृत्युना दूषितं तत् ॥

D. No. 18094.

Page, 1. Lines, 4 on a page. Grantha. Slightly injured. Extent, 7 granthas.

एकादशीनिर्णयः ।

EKĀDAŚĪNIRṆAYAḤ.

Begins on fol. 27 (*a*) of the manuscript described under D. No. 2829.

Similar to the work described under D. No. 3102.

Incomplete.

Beginning :

षट् पञ्च दशमी विद्धा सप्तपञ्चाधिका तथा ।
अष्टाधिका महाविद्धा विष्णुभक्तैर्विवर्जिता ॥

End :

पञ्चपञ्चाशदधिका घटिका दशमी यदि ।
एकादशीं परित्यज्य द्वादशीं समुपोषयेत् ॥

D. No. 18095.

Pages, 18. Lines, 6 on a page. Telugu. Injured. Extent, 225 granthas.

कृष्णकर्णामृतम् by लीलाशुकः ।

KṚṢṆAKARṆĀMṚTAM by Līlāśuka.

Begins on fol. 96 (*a*) of the manuscript described under D. No. 3013.

Incomplete.

Contains 2nd Āsvāsa only.

Same work as that described under D. No. 9885.

D. No. 18096.

Pages, 2. Lines, 8 on a page. Grantha. Good. Extent, 24 granthas.

ज्योतिषविषयः ।

JYOTIṢAVIṢAYAḤ.

Begins on fol. 1 (*a*) of the manuscript described under D. No. 974.

Incomplete.

Gives the good and bad days with the various Naksatras.

Beginning :

त्रीण्युत्तराणि हस्तं च रेवती श्रावणं तथा ।
मूलं च रविवारेण सिद्धियोगस्तथोत्तमा ॥

रोहिणी सौम्यवारेण स्वाती चित्रा पुनर्वसू ।
रविवारेण संयुक्ता ह्येतेऽशुभमध्यमाः ॥

End :

आदित्याश्विनि पुष्यश्च स्वाती पौत्रं तथैव च ।
सुराचार्यदिनैर्युक्ताः शुभयोगाः शुभावहाः ॥

इन्द्राग्निभाद्यष्टकश्च सार्पं भार्ग्यं तथैव च ।
सुराचार्यदिनैर्युक्ताः शुभयोगाः शुभा गुणाः ॥

*   *   *   *   *

D. No. 18097.

Pages, 3. Lines, 7 on a page. Grantha. Slightly injured. Extent, 19 granthas.

वैदिकस्वरलक्षणम् ।

VAIDIKASVARALAKṢAṆAM.

Begins on fol. 2 (*a*) of the manuscript described under D. No. 974.

Incomplete—Wants beginning and end.

Deals with the rules of Svara in Vedic Texts-

Beginning :

अनित्यश्च विधिर्यत्र प्रोच्यते तत्र तत्र तु ।
ह्रस्वस्य वाथ दीर्घस्य वोपलक्षणमीरितम् ॥

आयोध्वर्यो कृतो पूर्वो दोषस्याभग्रहोऽपि च (?) ।
अन्ये तु पूर्वके न स्यादनुलोमविलोमयोः ॥

राये अस्मानिति यश्चालोपः परिकीर्तितः ।
जटायामेव संज्ञीया गतिरन्या न विद्यते ॥

End :

अनुस्वारोऽपि नित्यः स्यात्सर्वत्रैकपदे स्थितः ।
ततोऽन्यसंसर्गश्चेति न स्यादभादितित्यतः ॥

अचि परे यथा रङ्गः पूर्वं ह्रस्ववदुच्यते ।
हलि परे यथा रङ्गः पूर्वो दीर्घो भवेद्यदि ॥

भाष्यं चेद्विवृणोत्स्वयं यतिपतिर्व्याख्यानवाचां तदा
गांभीर्यादनवस्थितिर्मितमतिर्दूरे जनस्तद्गिराम् ।
प्रष्टव्यः कथमीश्वरः स हि न नः प्रत्यक्षरूपो दृशां
तद्भाष्यं स च भाष्यकृत्स च हरिः सम्यक्प्रसीदन्तु नः ॥

D. No. 18098.

Pages 3. Lines, 9, 11 on a page. Grantha. Good. Extent, 36 granthas.

गुरुपरम्परा ।

GURUPARAMPARĀ,

Begins on fol. 175 (*a*) of the manuscript described under D. No. 2851.

Complete.

List of the line of preceptors of an individual scholar.

Beginning :

श्रीवीरराघवगुरोस्तनयं ततश्च
शारीरकादि समधीत्य समस्तशास्त्रम् ।
विद्योतमानमनवद्यगुणैकतानं
श्रीरङ्गनाथगुरुवर्यमहं प्रपद्ये ॥

श्रीवेङ्कटेशगुरुणा करुणाकरणाकरणे
श्रीशे समर्पितभरं श्रितपारिजातम् ।
श्रीरङ्गनाथगुरुवीक्षणलब्धबोधं
श्रीराघवं गुरुमहं शरणं प्रपद्ये ॥

End :

श्रुत्यन्तेषु श्रुतं भाष्ये मतं ध्यातं हृदंबुजे ।
लक्ष्मीधरं प्रपद्येऽहं दृष्टं श्रीरङ्गधामनि ॥

D. No. 18099.

Pages, 46. Lines, 6 on a page. Grantha. Good. Extent, 345 granthas.

सामवेदब्राह्मणम् ।

SĀMAVEDABRĀHMAṆAM.

Begins on fol. 12 (*a*) of the manuscript described under D. No. 60.

Complete.

Contains the 4th Ārṣeyabrāhmaṇa and 5th Devatādhyāyabrāhmaṇa.

Same work as that described under D. No. 58.

D. No. 18100.

Pages, 24. Lines, 7 on a page. Grantha. Slightly injured. Extent, 145 granthas.

इतिहासोपनिषत् ।

ITIHĀSOPANIṢAT.

Begins on fol. 7 (*a*) of the manuscript described under D. No. 2594.

Complete.

Same work as that described under D. No. 298.

D. No. 18101.

Pages, 80. Lines, 9—12 on a page. Grantha. Injured. Extent, 600 granthas.

कुलार्णवः ।

KULĀRṆAVAḤ.

Begins on fol. 1 (*a*) of the manuscript described under D. No. 2452.

Incomplete.

Contains 1 to 3 Ullāsas complete and 4th incomplete.

Same work as that described under D. No. 5587 wherein see for the beginning.

End :

ललिता च क्षमा चेति नोक्ता यद्वर्णदेवताः ।
त्रितारमूलमन्त्रान्ते स्वरान् विष्णून् सशक्तिकान् ॥
चतुर्थ्या नामसंयुक्ता मस्तके ।

D. No. 18102.

Pages, 6. Lines, 8 on a page. Telugu. Injured. Extent, 36 granthas.

ब्रह्मणोऽग्नेः संविधान इति सूक्तमन्त्रः ।

BRAHMAṆOGNEḤ SAṀVIDHĀNA ITI SŪKTAMANTRAH.

Begins on fol. 106 (*a*) of the manuscript described under D. No. 2452.

Complete.

Beginning :

ब्रह्मणोऽग्नेः संविधान इति सूक्तमाहामन्त्रस्य मैत्रावरुणपुत्रो वसिष्ठ ऋषिः । अनुष्टुप् छन्दः । कालाग्निरुद्रो देवता । नं बीजं, क्षीं शक्तिः । मं कीलकं, क्षामित्याद्यङ्गन्यासकरन्यासः ।

ध्यानम्—

प्रालेयामलमिन्दुकुन्दधवलं गोक्षीरफेनप्रभं
भस्माभ्यङ्गमनङ्गदेहदहनज्वालावलीलोचनम् ।
विष्णुब्रह्ममरुद्गणार्चितपदं ऋग्वेदनादोदयं
वन्देऽहं सकलङ्कशङ्करहितं स्थाणोर्मुखं पश्चिमम् ॥

End:

सर्वमङ्गलमाङ्गल्ये शिवे सर्वार्थसाधके ।
शरण्ये त्र्यंबके देवि नारायणि नमोऽस्तु ते ॥
नमस्ते शारदादेवि काश्मीरपुरवासिनि ।
त्वामहं प्रार्थये नित्यं विद्यादानं प्रदेहि मे ॥

D. No. 18103.

Pages, 58. Lines, 7—8 on a page. Telugu. Injured. Extent, 356 granthas.

प्रणवकल्पः ।

PRAṆAVAKALPAH.

Begins on fol. 109 (*a*) of the manuscript described under D. No. 2452-

Incomplete.

Contains 1 to 4 Adhyāyas complete and 5th incomplete.

Similar to the work described under D. No. 7922.

Each Adhyāya contains the following Prakaraṇas.

प्रथमाध्यायः—

१. प्रणवपीठिका ।

२. प्रणवकवच ।

३. प्रणवहृदयम् ।

द्वितीयाध्यायः—

१. प्रणवाष्टोत्तरशतम् ।

२. प्रणवनामषोडशकम् ।

तृतीयाध्यायः—

१. प्रणवपञ्जरम् ।

२. प्रणवमालामन्त्रः ।

३. प्रणवमन्त्रः ।

४. प्रणवस्तवराजः ।

५. प्रणवाक्षरमालिका ।

चतुर्थाध्यायः—

१. प्रणवगीता ।

Beginning :

अथ प्रणवकल्पो विलिख्यते—

सत्रान्ते नैमिशारण्ये शौनकश्च महायशाः ।
आसीनं मुनिशार्दूलं सूतं पौराणिकोत्तमम् ॥
सम · · · परिवृत्य शौनकाद्या महर्षयः ।
यथेष्टाः सत्कथाः पुण्याः पर्यपृच्छन्मुमुक्षया ॥
मन्त्रान् प्रशंसया तत्र शौनकः प्रत्यभाषत ।

शौनकः—

सून सूत महाप्राज्ञ व्यासशिष्य महामते ।
श्रुताः पुराणसंसिद्धाः मन्त्रगोप्याश्च सत्कथाः ॥

Colophon :

इति स्कान्दे पुराणे वैष्णवसंहितायां मन्त्रप्रस्तावे प्रणवकल्पो नाम प्रथमोऽध्यायः ।

End :

पठन्तु श्रृण्वन्तु च वाचयन्तु
लिखन्तु गायन्तु च बोधयन्तु ।
ओंकारकल्पं यतिवृन्दसेव्यं
सूतोक्तमीशोक्तमनिर्मितञ्च

Colophon :

इति स्कान्दे पुराणे वैष्णवसंहितायां मन्त्रप्रस्थाने प्रणवकल्पो नाम चतुर्थोऽध्यायः ।

D. No. 18104.

Pages, 42. Lines, 8 to 10 on a page. Grantha. Injured. Extent, 300 granthas.

ललितासहस्रनामावलिः ।

LALITĀSAHASRANĀMĀVALIḤ.

Complete.

Same work as that described under R. No. 185.

D. No. 18105.

Palm leaf. $6\frac{1}{2} \times 1\frac{1}{4}$ inches. Pages, 58. Lines, 7 on a page. Grantha. Good Old. Extent, 253 granthas.

चक्रराजलक्षणम् ।

CAKRARĀJALAKṢAṆAM.

Incomplete.

Explains the significance and efficacy of Cakra or the Disc.

Beginning :

अथ वक्ष्ये विशेषेण चक्रराजस्य लक्षणम् ।
सर्वपापहरं पुण्यं सर्वदुःखनिवारणम् ॥

जयदं श्रीप्रदं चैव श्रीकरारोग्यभोग्यदम् ।
सर्वदेवात्मकं सिद्धं साक्षात्कममकारणम् ॥

सृष्टिस्थितिलयाकारं(स) दानुग्रहकारणम् ।
पञ्चकृत्यं स्वयं नित्यं पञ्चब्रह्मात् परापरम् (?) ॥

End :

अघोरचक्रशक्तीनां नामभेदान् यथा शृणु ।
विश्वावेशपतिं सौम्यां प्रज्ञानन्दपरामपि (?) ॥

अकारी च उकारी च मकारी बिन्दुरूपिणी ।
अर्धचन्द्रनिरोधीनां नान्दातन्दरूपिणी (?) ॥

शक्तिर्व्यापि नि नसमाना उन्माना व्योमरूपिणी ।
अन्ता अनन्त अनाथ अनाश्रित प्रताि... (?) ॥

Foll. 30 to 57 left blank.

Fol. 58 to 60 contain Śivasahasranāma.

D. No. 18106.

Palm leaf. 14½ × 1¼ inches. Pages, 134. Lines, 7—8 on a page. Telugu. Much injured. Extent, 2,500 granthas.

गौतमधर्मसूत्रम् with मिताक्षरा by गौतम and हरदत्त ।

GAUTAMADHARMASŪTRAM with Mitākṣarā by Gautama and Haradatta.

Incomplete.

Contains from 16th Sūtra of 4th Adhyāya to the end of 27th Sūtra of 28th Adhyāya.

Same work as that described under D. No. 1205.

D. No. 18107.

Pages, 6. Lines, 7 on a page. Grantha. Injured. Extent, 32 granthas.

चाटुश्लोकाः ।

CĀṬUŚLOKAḤ.

Begins on fol. 24 (*a*) of the manuscript described under D. No. 9078.

Similar to the work described under D. No. 12016.

Beginning :

गङ्गास्नानपरो यस्तु जननीचरणोदके ।
. . . . . धारयेद्भक्त्या गङ्गास्नानफलं लभेत् ॥

* * * * *

ब्रह्मविद्याधिकारश्च नान्येषां ब्राह्मणं विना ।
सर्वेषां पुनरावृत्तिर्नास्ति ब्रह्मविदो जनाः ।

* * * * *

तीर्थे विवाहे यात्रायां संग्रामे देवतालये ।
आग्निदाहे प्रवासे च सृष्टिदोषो न विद्यते ।

End :

इष्टो वा यदि वा द्वेष्यो मूर्खः पण्डित एव च ।
संप्राप्त वैश्वदेवान्ते . . . . . . ॥

* * * * *

देहभङ्गे प्रवासे च प्रवृत्ते व्यसनेष्वपि ।
रक्षयेदात्मदेहश्च सर्वकार्याणि साधयेत् ॥

D. No. 18108.

Pages, 6. Lines, 6 on a page. Grantha. Injured. Extent, 24 granthas.

रामायणश्लोकाः ।

RĀMĀYAṆAŚLOKĀḤ.

Some selected verses from Yuddhakāṇḍa and Sundarakāṇḍa.

Beginning :

ततः क्रुद्धो महाबाहु रघूणां कीर्तिवर्धनः ।
सन्धाय धनुषा रामः क्षुरमाशीविषोपमम् ॥

अजानन्निव किं वीर त्वमेवमनुवर्तसे ।
विसृजास्मै वधाय त्वमस्त्रं पैतामहं प्रभो ॥

End :

लक्ष्मणश्च महातेजाः सुमित्रानन्दवर्धनः ।
आभिवाद्य महाबाहुस्सोऽपि कौशलमब्रवीत् ॥

रामस्य च सखा देवि सुग्रीवो नाम वानरः ।
राजा वानरमुख्यानां स त्वां कौशलमब्रवीत् ॥

नित्यं स्मराति रामस्त्वां ससुग्रीवः सलक्ष्मणः ।

Foll. 30, 31 contain some subhāṣitas.

D. No. 18109.

Palm leaf. 9 × 1 inches. Pages, 65. Lines, 5—6 on a page. Grantha. Injured. Extent, 300 granthas.

सीताविजयम् by वसिष्ठः ।

SĪTĀVIJAYAM by Vasiṣṭha.

Complete in Seven Adhyāyas.

Same work as that described under R. No. 148.

D. No. .18110.

Palm leaf. 15½ × 1 inches. Pages, 63. Lines, 5—6 on a page. Grantha. Injured. Extent, 567 granthas.

पराशरमाधवीयम् by माधवाचार्यः ।

PARĀŚARAMĀDHAVĪYAM br Mādhavācārya.

Incomplete.

Contains Prāyaścittakāṇḍa (incomplete).

Same work as that described under D. No. 2656.

Beginning :

वागीशाद्याः सुमनसः सर्वार्थानामुपक्रमे ।
यं नत्वा कृतकृत्याः स्युस्तं नमामि गजाननम् ॥

*　　*　　*　　*　　*

आचारकाण्डरूपेणातीतेन अध्यायत्रयेण विधिनिषेधौ दर्शितौ । अथेदानीं तदुल्लंघननिमित्तपातित्यपरिहारोपायप्रतिपादकं प्रायश्चित्तकाण्ड-मारभ्यते ।

End :

. . . . . गात्रात् संग्राह्यं श्रौत स्मार्तं तथैव च ।
पुत्रं गृहीत्वा संस्तुत्य ह्यो य स्था श्रुतं पिता ।
नामगोत्रादि तत्सर्वं कुर्या . . . . . ।

D. No. 18111.

Pages, 5. Lines, 6—7 on a page. Telugu. Slightly injured. Extent, 30 granthas.

हयग्रीवपञ्जरमन्त्रः ।

HAYAGRĪVAPAÑJARAMANTRAḤ.

Begins on fol. 82 (*a*) of the manuscript described under D. No. 2765.

Complete.

Similar to the work described under D. No. 7699.

Beginning :

अस्य श्रीहयग्रीवपञ्जरमहामन्त्रस्य संकर्षण ऋषिः । अनुष्टुप् छन्दः । हयग्रीवः परमात्मा नारायणो देवता । मं बीजं, नमः शक्तिः, मम हयग्रीवप्रसादसिद्ध्यर्थे जपे ऋग्यजुस्सामरूपाय, अङ्गुष्ठाभ्यां नमः ।

End :

इति द्वादशमन्त्रेण नमस्कुर्याज्जनार्दनम् ।
प्राह प्रसन्नवदनः पाराशर्यमनिन्दितम् ।
पुण्डरीकासनासीनं वाणीसन्तानशोभितम् ।
देवतासार्वभौमं तं ध्यायेन्मन्त्रस्य सिद्धये ॥

D. No. 18112.

Pages, 13. Lines, 5 on a page. Telugu. Slightly injured. Extent, 80 granthas.

व्याकरणपत्रम् ।

VYĀKARAṆAPATRAM.

Begins on fol. 75 (*a*) of the manuscript described under D. No. 2765.

Incomplete.

Beginning :

शब्देन्दुशेखरे विद्यमानः इति मया समाहितम् । अचः परस्मिन्निति मनोरमायां पूर्वशब्दस्य ससंबन्धिकतया किंनिमित्तं पूर्वत्वमित्याशङ्क्य सन्निहितं पूर्वत्वमेव वक्तव्यम् । सन्निहितं चेह त्रयम् । स्थान्यादेशौ निमित्तम् । तत्र न तावत् स्थानी अवधिः ।

End :

अङ्गस्य सुप इत्येव सूत्रमस्तु । अङ्गस्येतिषष्ठ्याः अवयवावयविभावः संबन्ध अर्थः । तथाचाङ्गावयवभूतस्य सुपो लुगित्यर्थः । ततश्च राम इत्यादि लक्ष्यानुसारात् निमित्तनिमित्तिभावो न षष्ठ्यर्थः ।

* * * * *

अङ्गस्य सुप इति सूत्रकरणमयुक्तम् । सुपो धातुप्रातिपदिकयो-रिति सूत्रकरणमेव समीचीनम् ।

D. No. 18113.

Pages, 8. Lines, 6 on a page. Grantha. Good. Extent, 50 granthas.

भारद्वाजशिक्षा ।

BHĀRADVĀJAŚIKṢĀ.

Begins on fol. 1 (*a*) of the manuscript described under D. No. 4021.

Incomplete.

Contain verses 1 to 40 and 48 to 50 only.

Same work as that described under D. No. 939.

D. No. 18114.

Palm leaf. 14 × 13 inches. Pages, 58. Lines, 6—8 on a page. Telugu. Injured. Extent, 725 granthas.

गृह्यरत्नम् by वेङ्कटाचार्यः ।

GṚHYARATNAM by Veṇkaṭācārya.

Incomplete.

Contains Khaṇḍas 1 to 8, 10, 11 complete, 12, 17, 18 to 21 incomplete, 13 to 16 wanting.

Same work as that described under D. No. 1199 wherein see for the beginning.

End :

विंशतिः खण्डः—अथ नवतन्तुदेवताः ग्रन्थित्रयदेवताः, यज्ञोपवीताधिदेवताः चावाह्य गन्धादिभिरभ्यर्च(र्च्य)त् ।

(भू)र्वारि तेजो वायुः खं प्राण, आत्मत्रयं तथा ।
क्रमाद्भवन्ति तन्तूनां नवानमधिदेवताः ।
ग्रन्थित्रयस्याप्यधिपाः पितामहहरीश्वराः ।
यज्ञोपवीताकारस्य . . . . ।

Foll. 30, 31, 32, contain Gṛhyaprayoga.

Foll. 19, 20, 25 to 32, 38, 39, 41 to 45, are wanting.

D. No. 18115.

Pages, 6. 7⅝ × 1½ inches. Lines, 8 on a page. Grantha. Slightly injured. Extent, 30 granthas.

सुग्रीवप्रश्नः ।

SUGRĪVAPRAŚNAḤ.

Begins on fol. 1 (*a*) of the manuscript described under D. No. 10630.

An Astrological work giving the effects of the various planets.

Complete.

Beginning :

कटकः सविता सिद्धिं प्रियङ्गः सविता सुखम् ।
श्रीरुद्रो भूमिजे नाशं . . . . सुखं भवेत् ॥

लाङ्गले वाक्पते राज्यं गोत्राय सितमुत्तमम् ।
कुरङ्गार्कक (ज) हानिः स्यात् काले . . . राहुबन्धनम् ॥

End :

गृहक्षेत्रादिवृद्धिः स्यान्मित्रबन्धुसुहृत्प्रियम् ।
राहोर्नृपाणां क्षोभं स्यात् युद्धेऽल्पविजयं भवेत् ॥
व्याधिश्च दीर्घकालं स्यात् मरणं च भविष्यति ।

केतुफलम्—

ध्वजोदये फलं वक्ष्ये दिनषड्विंशतिः फलम् ।
केतोर्नृपस्य विजयं शत्रुर्विजयमाप्नुयात् ॥
नानाव्याधितरश्चैवामरणञ्च भविष्यति ॥

Colophon :

सुग्रीवप्रश्नः संपूर्णः ।

D. No. 18116.

Pages, 10. 7⅝ × 1½ inches. Lines, 7, 8 on a page. Grantha. Slightly injured. Extent, 54 granthas.

प्रश्नशास्त्रम् ।

PRAŚNAŚĀSTRAM.

Begins on fol. 3 (*b*) of the manuscript described under D. No. 10630.

Complete.

Similar to the work described under R. No. 1169.

Beginning :

मीने मिथुनकुंभे च धनुर्गर्भद्विसंज्ञिका ।
मेषकर्किंतुला नव्यो शरणिद्वारसंज्ञिका ॥

वृषसिंहालिकुंभे च बाह्यराशिमितास्थिरम् ।
गर्भेरेक्तवर्णं स्यात् द्वारे श्वेतं विनिर्दिशेत् ॥

End :

देहजाड्यं मनःक्लेशं विशेषं शूद्रजातिभिः ।
स्त्रीक्रोधघातपातश्च शनेस्तु फलमादिशेत ॥

विद्यालाभं मनःप्रीतिं बन्धोरागमनं तथा ।
मनःसौख्यं विशोकाप्तिं बुधस्य फलमादिशेत् (?) ॥

मृगभीतिं मनःखेदं देहजाड्यं शिरोरुजः ।
वमनं दृष्टिदोषश्च केतोश्च फलमादिशेत ॥

गतलाभं पक्वफलं निद्रासौख्यं धनागमम् ।
स्त्रीक्रीडाबन्धुसौ(ख्यं च) शुक्रस्य फलमादिशेत ॥

D. No. 18117.

Pages, 5. Lines, 9 on a page. 13 × 1⅜ inches. Grantha. [Slightly injured. Extent, 72 granthas.

कार्तिकमाहात्म्यम् ।

KĀRTIKAMĀHĀTMYAM.

Begins on fol. 9 (*a*) of the manuscript described under D. No. 10630.

Incomplete.

Breaks off in middle of 2nd Adhyāya.

Same work as that described under R. No. 72 with different readings.

Beginning :

श्रीमन्नृसिंहविभवे गरुडध्वजाय
तापत्रयोपशमनाय भवौषधाय ।
कृष्णारिवृश्चिकजलाग्निभुजङ्गरोग-
क्लेशव्ययाय हरये गुरवे नमस्ते ॥

* * * * *

आलोलतुलसीमालमारूढविनतासुतम् ।
ज्योतिरिन्दीवरश्याममाविरस्तु ममाग्रतः ॥

* * * * *

अतोऽहं प्रष्टुमिच्छामि किञ्चित्त्वां मधुसूदन ।
यदि त्वं मत्प्रियकरः कथयस्वात्र विस्तरम् ॥

Colophon :

इति श्रीपाद्मे पुराणे कार्तिकमाहात्म्ये प्रथमोऽध्यायः ॥

End :

कार्तिके मासि ये नित्यं तुलासंस्थे दिवाकरे ।
प्रातः स्नास्यन्ति ते मुक्ता महापातकिनोऽपि च ॥

स्नानं जागरणं दीपात्तुलसींवनपालनम् ।
कार्तिके ये प्रकुर्वन्ति ते नरा विष्णुमूर्तयः ॥

* * * * *

विष्णुरूपधराः सम्यग्वैनतेयध्वजान्वितम् ।
आरोहयन्विमा . . . . ॥

D. No. 18118.

Pages, 24. Lines, 8 on a page. Granthas. Slightly injured. Extent, 230 granthas.

जातकचन्द्रिका by वेङ्कटेश्वरः ।

JĀTAKACANDRIKĀ by Veṅkaṭeśvara.

Begins on fol. 12 (*a*) of the manuscript described under D. No. 10630.

Complete.

Same work as that described under R. Nos. 874 (*c*) 392 and (*b*) wherein see for the beginning and end respectively.

D. No. 18119.

Palm leaf. 15 × 1¼ inches. Pages, 104. Lines, 7 on a page. Grantha. Injured. Extent, 1,200 granthas.

स्वरसिद्धान्तचन्द्रिका by श्रीनिवास ।

SVARASIDDHĀNTACANDRIKĀ by Śrīnivāsa.

Incomplete.

Contains from the middle portion of Svarasiddhānta prakaraṇa to the end.

Same work as that described under R. No. 1486 wherein see for the end.

Beginning :

एतच्चास्मिन् प्रकरणे पञ्चमीनिर्देशेऽपि व्यवहिते कार्यं भवतीति ज्ञापयति । अन्यथा तस्मादित्युत्तरस्येति सिद्धान्ते तद्ग्रहणवैफल्यात् । ज्ञापनफलं तु यद्वृत्तान्नित्यमित्यत्र वक्ष्यामः ।

गतिर्गतौ । गतौ परतो गतिरनुदात्तो भवति ।

D. No. 18120.

Pages, 15. Lines, 6, 7 on a page. Grantha. Slightly injured, Extent, 157 granthas.

तर्कसंग्रहदीपिकाव्याख्या by नीलकण्ठः ।

TARKASAṄGRAHADĪPIKĀVYĀKHYĀ by Nīlakaṇṭha.

Begins on fol. 1 (*a*) of the manuscript described under D. No. 9733.

Incomplete.

Contains from Prāmāṇyavāda to the end of Bhramakhaṇḍa.

Same work as that described under D. No. 4167.

Beginning :

प्रमाणप्रसङ्गात् प्रमात्वस्य परतो ग्राह्यतां व्यवस्थापयिष्यन्नाह—ज्ञानानामिति ।

End :

तर्के आपाद्यव्यतिरेकनिश्चयः आपाद्यापादकयोः व्याप्तिनिश्चयश्च कारणमिति ध्येयम् । तर्कस्तु मानसविपर्यय एवेति कथमयथार्थस्य त्रैविध्यकथनमित्याह दीपिकायां यद्यपीति ।

D. No. 18121.

Pages, 34. Lines, 4 to 7 on a page. Grantha. Injured. Extent, 120 granthas.

वेदपञ्चाशदनुक्रमणिका ।

VEDAPAÑCĀŚADANUKRAMAṆIKĀ.

Begins on fol. 65 (*a*) of the manuscript described under D. No. 853.

Incomplete.

A table of contents of the Vedic passages.

Beginning :

उभावा होतर्दोष।गन्यसुवस्संज्यो · · · माय पितृमते सुवानस्सोमो वर्धन्तु त्वा · · · · · · जन्दिवोऽस्य जगतो रराणो वीहिकव्यवाहन पितृन् कर्मण्यस्वधायै नमो मन्या(वै)मशं ग्रदेयं सन्ते वायुरग्नेयं यज्ञं क्षये पाथाध्रुध्रुवाक्षितिरपामति व्रतमेकास्यसुमतावग्निर्वृत्राणि चर्षणीनां य इमा वीरश्शतमन्युः पयसा महीगां सुहिरण्ये सुशिल्पे शुक्रास्ताः पुष्टं पशुमन्यते त्रिंशत् ।

End :

आप उन्दन्तु पशुवृष्टिसनीः पशुक्रतव्यामर्त्येष्वासधा पूषोभावां योनिरेष्टो विष्णो मत्बलैः प्रजापते पृथिव्याङ्गिरसी ग्रामी देवयश-स्यामया विश्वौत्री वरुणी सावित्री सहस्रतमी देव्यदिते वशान्नायोपायवः पराहागाद्विषणायं स्वाहा योनिः प्रजां द्विस्त्वष्टासोमन्तेभ्यः पुनरकर्नैत्यग्रोध कवचतं हेमे सावित्र · · · · रोयन्तीहानयुक्ष्वोपहूताश्वतुरसप्ततिः ।

D. No. 18122.

Page, 1. Lines, 11 on a page. Grantha. Good. Extent, 8 granthas.

बालान्यासः ।

BĀLĀNYĀSAḤ.

Begins on fol. 25 (*a*) of the manuscript described under D. No. 6742.

Complete.

Same work as that described under D. No. 6761.

Fol. 26 contains Tripurasundarīpūjā.

D. No. 18123.

Pages, 4. Lines, 10, 11 on a page. Telugu. Slightly injured. Extent, 44 granthas.

बालात्रिपुरसुन्दरीसहस्रनामावलिः ।

BĀLĀTRIPURASUNDARĪSAHASRANĀMĀVALIḤ.

Begins on fol. 27 (*a*) of the manuscript described under D. No. 6742.

Incomplete.

Contains about 414 names only.

Same work as that described under D. No. 9151.

D. No. 18124.

Pages, 6. Lines, 7 on a page. Grantha. Slightly injured. Extent, 20 granthas.

नामनक्षत्रादिफलनिरूपणम् ।

NĀMANAKṢATRĀDIPHALANIRŪPAṆAM.

Begins on fol. 15 (*a*) of the manuscript described under D. No. 13974, wherein this work has been mentioned as Jyotiṣaviṣaya.

Incomplete.

Same work as that described under D. No. 13316, wherein see for the beginning.

End :

> धनिष्ठार्धं शतभिषक् पूर्वाभाद्रा त्रयः पादं कुंभः ।
> पूर्वाभाद्रापादमुत्तराभाद्रा रेवत्यन्तं मीनम् ॥

D. No. 18125.

Pages, 9. Lines, 7 on a page. Granthas. Slightly injured. Extent, 38 granthas.

वैद्यविषयः ।

VAIDYAVIṢAYAḤ.

Begins on fol. 19 (*a*) of the manuscript described under D. No. 13974.

This is a work in medicine, giving details of the preparation of medicines and other usages.

Incomplete.

Beginning :

> कल्कं त्रिमूलतैलन्तु सम्मर्द्य शिरसि क्रमात् ।
> दिनं विसृज्य च दिनं लिप्त्वा स्नानं समाचरेत् ॥
> वलीपलितनिर्मोक्षः क्रमेण भवति ध्रुवम् ।
> तन्मूलानि समादाय खण्डयित्वा विशोषयेत् ॥
> छायायां तत्समादाय भागद्वयमथाहरेत् ।
> अजविष्ठा त्वेकभागं भाण्डे निक्षिप्य चादरात् ॥

End :

> ब्रह्मद्रुबीजतैलं पलैकं क्षीरतुल्यकम् ।
> पीत्वामूर्च्छामवाप्नेन वक्त्रे तस्य गवां पयः ॥

स्तोकं स्तोकं सिचेत् क्षीरं प्रबोधो जायते क्षणात् ।
एवं सप्तदिनं कुर्यात् छिद्रां पश्यति मेदिनीम् ॥

माससात्रप्रयोगेण जीवेदाचन्द्रभास्करम् ।
तस्य मूत्रपुरीषाभ्यां शुद्धं भवति काञ्चनम् ॥

तत्तैलं चन्द्र वै ब्राह्मी मध्वाज्यसहितं पिबेत् ॥

D. No. 18126.

Pages, 4. Lines, 7 on a page. Grantha. Good. Extent, 20 granthas.

कृष्णमङ्गलानुशासनम् ।

KṚṢṆAMAṄGALĀNUŚĀSANAM.

Begins on fol. 37 (*a*) of the manuscript described under D. No. 12036.

Benedictory prayers or sayings about Lord Krishna.

Complete.

Beginning :

मङ्गलं यादवेन्द्राय मधुरापुरवासिने ।
वसुदेवतनूजाय श्रीकृष्णायास्तु मङ्गलम् ॥

ब्रह्मादिभिः प्रार्थिताय भुवो भारापनुत्तये ।
अवतीर्णो यदुकुले तस्मै कृष्णाय मङ्गलम् ॥

पूतनाया जिघांसन्त्याः पयःस्तन्यं सुदुर्जरम् ।
प्रपपौ यः सह प्राणैस्तस्मै कृष्णाय मङ्गलम् ॥

End :

योगिध्येयपदाब्जाय प्रणतार्तिहराय च ।
कल्याणगुणसान्द्राय तस्मै कृष्णाय मङ्गलम् ॥

मङ्गलाशासनमिदं यः पठेद् भक्तिमान्नरः ।
सपुत्रपौत्रः स भवेन्नित्यश्रीर्नित्यमङ्गलः ॥

D. No. 18127.

Pages, 7. Lines, 7 on a page. Grantha. Good. Extent, 40 granthas.

महालक्ष्मीकवचम् ।

MAHĀLAKṢMĪKAVACAM.

Begins on fol. 39 (*a*) of the manuscript described under D. No. 12036.

Complete.

Same work as that described under D. No. 6904 but with different end.

End :

विद्यार्थी लभते विद्यां पुत्रार्थी लभते सुतान् ।
राज्यार्थी लभते राज्यं सत्यमुक्तं मयानघ ॥

महालक्ष्म्या मन्त्रसिद्धिर्जपादस्य प्रजायते ।

एवं देवीप्रसादेन शुकः कवचमाप्तवान् ।
कवचानुग्रहेणैव सर्वान् कामानवाप्नुयात् ॥

D. No. 18128.

ages, 22. Lines, 8, 9 on a page. Grantha. Good. Eztent, 160 granthas.

चाटुश्लोकाः ।

ĀṬUŚLOKĀḤ.

Begins on fol. 42 (*b*) of the manuscript described under D. No. 12036.

Similar to the work described under D. No. 12016.

Complete.

Beginning :

छिनत्त्यम्बुजपत्राणि हंसः सह वसन्नपि ।
विकासयति तान्येव दूरस्थोऽपि दिवाकरः ॥

अनक्षरज्ञेन जनेन भाषितं
अनादरस्यापि नृपस्य सेवनम् ।
आलिङ्गनं लम्बपयोधराणां
प्रत्यक्षदुःखं त्रयमेव लोके ॥

सद्भिस्तु लीलया प्रोक्तं शिलालिखितमक्षरम् ।
असद्भिः शपथैः प्रोक्तं जले लिखितमक्षरम् ॥

आर्तार्ते मुदिते हृष्टा प्रोषिते मलिना कृशा ।
मृते म्रियेत या नारी सा स्त्री ज्ञेया पतिव्रता ॥

End :

अङ्गं चम्पकमालिकेति सुदृढं गाढं न संश्लिष्यतां
कामं स्यादिति कोमलाधरदलं नो खण्डनीयं त्वया ।
तन्वङ्गी सरसेति नैव विविधक्रीडारसैः खिद्यता-
मिक्षुः स्वादुतमो भवेदिति समं मूलेन किं खाद्यते ॥

*   *   *   *   *

श्लाघ्यं जन्म सुरूपता धनिकता नीरोगता प्राज्ञता
स्वाचारस्थिरता दया सुकुलता दाक्षिण्यवद्दारता ।
आयुष्मद्गुणिपुत्रता स्ववशता सौजन्यवन्मित्रता
श्रीशे भक्तिरतीव यस्य स नरः स्यान्मानुषानन्दवान् ॥

D. No. 18129.

Pages, 12. Lines, 7, 8 on a page. Grantha. Good. Extent, 96 granthas.

भारतसावित्री ।

BHĀRATASĀVITRĪ.

Begins on fol. 37 (*a*) of the manuscript described under D. No. 12015.

Complete.

Same work as that described under D. No. 5779 with an additional stanza in the beginning and different end.

Beginning :

सम्यङ्न्यायकलापेन महता भारतेन च ।
उपबृंहितवेदाय नमो व्यासाय विष्णवे ॥

End :

इमां भारतसावित्रीं लिखित्वा भक्तितः पुमान् ।
ब्राह्मणायार्पयेद्यो वै तेन तृप्यति केशवः ॥

Colophon :

इति महाभारते स्वर्गारोहणपर्वणि भारतसावित्री संपूर्णा ।

D. No. 18130.

Pages, 3. Lines, 7 on a page. Grantha. Slightly injured. Extent, 20 granthas.

पद्माक्षमालिकाप्रतिष्ठाविधिः ।

PADMĀKṢAMĀLIKĀPRATIṢṬHĀVIDHIḤ,

Begins on fol. 1 (*a*) of the manuscript described under D. No. 4460.

Complete.

Same work as that described under D. No. 2939 with an additional stanza in the end as given below.

End :

पद्माक्षतुलसीमालां पवित्रं च यथाक्रमम् ।
सन्धार्य नित्यकर्माणि विष्णोः प्रीत्यर्थमाचरेत् ।

Fol. 2 (*b*) contains Śrīcūrṇapratiṣṭhāvidhiḥ.

D. No. 18131.

Pages, 4. Lines, 7 on a page. Grantha. Slightly injured. Extent, 18 granthas.

आर्तत्राणपरायणस्तवः (सप्तर्षिस्तोत्रम् ।)

ĀRTATRĀṆAPARĀYAṆASTAVAḤ (Saptarṣistotram).

Begins on fol. 1 (*a*) of the manuscript described under D. No. 4620.

Complets. Contains 9 stanzas only and the beginning verse placed in the end.

Same work as that described under D. No. 9871 which contains fifty-five (55) verses.

D. No. 18132.

Pages, 2. Lines, 9, 10 on a page. Grantha. Slightly injured. Extent, 15 granthas.

व्यासपुत्राष्टकम् by व्यासः ।

VYĀSAPUTRĀṢṬAKAM by Vyāsa.

Begins on fol. 3 (*a*) of the manuscript described under D. No. 4620.

Complete.

Same work as that described under R. No. 1229 (*f*).

D. No. 18133.

Pages, 3. Lines, 9 on a page. Grantha. Slightly injured. Extent, 16 granthas.

मनीषापञ्चकम् by शङ्कराचार्य ।

MANĪṢĀPAÑCAKAM by Śaṅkarācārya.

Begins on fol. 4 (*a*) of the manuscript described under D. No. 4620.

Complete.

Same work es that described under D. No. 4705.

D. No. 18134.

Pages, 2. Lines, 8 on a page. Grantha. Slightly injured. Extent, 7 granthas.

कौपीनपञ्चकम् ।

KAUPĪNAPAÑCAKAM.

Begins on fol. 5 (*a*) of the manuscript described under D. No. 4620.

Complete.

Same work as that described under R. No. 1229 (*c*) with a slight difference in order.

D. No. 18135.

Pages, 2. Lines, 8 on a page. Granthas. Slightly injured. Extent, 7 granthas.

शिवोऽहंपञ्चकम् by शङ्कराचार्यः ।

ŚIVOHAMPAÑCAKAM by Śaṅkarācārya.

Begins on fol. 5 (*b*) of the manuscript described under D. No. 4620.

Complete.

Same work as that described under D. No. 4630, wherein this work is stated as Pāñcarātram.

D. No. 18136.

Pages, 2. Lines, 8 on a page. Grantha. Slightly injured. Extent, 9 granthas.

वक्रतुण्डाष्टकम् ।

VAKRATUṆḌĀṢTAKAM.

Begins on fol. 6 (*a*) of the manuscript described under D. No. 4620.

Similar to the work described under D. No. 11197.

Complete.

Beginning :

उमाप्रेमजालं लसत्सामलोलं
कनद्रक्तचेलं विराजत्कपोलम् ।
जगज्जन्ममूलं जगद्वेषकालं
नमाम्येकदन्तं नतानेकदं तम् ॥

विहङ्गे वृषाङ्गे भुजङ्गे तुरङ्गे
जनाङ्गेऽखुकाङ्गे मदीयान्तरङ्गे ।
चरन्तं वसन्तं नितान्तं महान्तं
नमाम्येकदन्तं नतानेकदं तम् ॥

End :

स्वशक्त्यादिशक्त्यन्तसिंहासनस्थं
मनोहारि सर्वाङ्गरक्तादिभूषम् ।
जटाहीन्दुगङ्गास्थिशम्याकमौलिं
पराशक्तिमित्रं नमः पञ्चवक्त्रम् ॥

D. No. 18137.

Pages, 5. Lines, 8, 9 on a page. Grantha. Slightly injured. Extent, 24 granthas.

दक्षिणामूर्त्यष्टकम् by शङ्कराचार्यः ।

DAKṢIṆĀMŪRTYAṢṬAKAM by Śaṅkarācārya.

Begins on fol. 6 (*b*) of the manuscript described under D. No. 4620.

Complete.

Same work as that described under R. No. 118 (*b*) with some additional verses in the end as given below :—

End :

वटविटपिसमीपे भूमिभागे निषण्णं
सकलमुनिजनानां ज्ञानदातारमारात् ।
त्रिभुवनगुरुमीशं दक्षिणामूर्तिदेवं
जननमरणदुःखच्छेददक्षं नमामि ॥

चित्रं वटतरोर्मूले वृद्धाः शिष्या गुरुर्युवा ।
गुरोस्तु मौनं व्याख्यानं शिष्यास्तु छिन्नसंशयाः ॥

चिद्घनाय महेशाय वटमूलनिवासिने ।
सच्चिदानन्दरूपाय दक्षिणामूर्तये नमः ॥

गुरवे सर्वलोकानां भिषजे भवरोगिणाम् ।
निधये सर्वविद्यानां दक्षिणामूर्तये नमः ॥

अज्ञाननाशने दक्षं दीक्षितं भक्तरक्षणे ।
वटमूलाश्रयं त्र्यक्षं दक्षिणामूर्तिमाश्रये ॥

D. No. 18138.

Pages, 2. Lines, 8 on a page. Grantha. Slightly injured. Extent, 7 granthas.

शिवभुजङ्गः ।

ŚIVABHUJAṄGAḤ.

Begins on fol. 9 (*a*) of the manuscript described under D. No. 4620.

Complete.

Similar to the work described under D. No. 11197.

Beginning :

अकण्ठेकलङ्कादनङ्गेभुजङ्गा-
दपाणौकपालादफालेऽनलाक्षात् ।
अमौलौशशाङ्कादवामेकलत्रा-
दहं दैवमन्यन्न मन्ये न मन्ये ॥

End :

महादेव देवेश देवादिदेव
स्मारारे पुरारे यमारे हरेति ।
ब्रुवाणः स्मरिष्यामि भक्त्या भवन्तं
ततो मे दयाशील देव प्रसीद ॥

D. No. 18139.

Pages, 2. Lines, 9 on a page. Grantha. Slightly injured. Extent, 11 granthas.

वेङ्कटेशाष्टकम् ।

VEṄKAṬEŚĀṢṬAKAM.

Begins on fol. 10 (*a*) of the manuscript described under D. No. 4620.

Similar to the work described under D. No. 10389.

D. No. 18140.

Pages, 4. Lines, 7 on a page. Grantha. Slightly injured. Extent, 17 granthas.

शिवभुजङ्गः ।

ŚIVABHUJAṄGAḤ.

Begins on fol. 10 (*b*) of the manuscript described under D. No. 4620.

Complete.

Similar to the work described under R. No. 61 (*o*).

Beginning :

तुषाराद्रिकन्याकृतालिङ्गनाङ्ग
वृषारूढ गङ्गामृगाङ्कोत्तमाङ्ग ।
विषालंकृतश्रीवरग्रीवसङ्ग
मृषावादिनं मामवानङ्गभङ्ग ॥

शिवे ज्ञान (?) गौरीश विश्वेश शंभो
भवानीश भूतेश भक्तप्रियालो ।
भवासङ्ग दीनावन श्रीदयालो
भवत्पादपद्मे मनो मेऽस्तु [नित्यम्] ॥

न मृत्युर्न कार्यं न मे जातिभेदा
पिता नैव मे नैव माता न जन्म ।
न बन्धुर्न मित्रं गुरुर्नैव शिष्य-
श्चिदानन्दरूपः शिवोऽहं शिवोऽहम् ॥

न गन्धं न पुष्पं न धूपं न दीपं
न नैवेद्यतांबूलपुष्पाञ्जलिं च ।
कृतः सद्गुरोः पादपद्मप्रणाम-
श्चिदानन्दरूपः शिवोऽहं शिवोऽहम् ॥

D. No. 18141.

Pages, 7. Lines, 7 on a page. Grantha. Slightly injured. Extent, 32 granthas.

कैवल्योपनिषत् ।

KAIVALYOPANIṢAT.

Begins on fol. 49 (*b*) of the manuscript described under D. No. 4620.

Complete.

Same work as that described under D. No. 395.

D. No. 18142.

Pages, 7. Lines, 5 on a page. Telugu. Slightly injured. Extent, 30 granthas.

अभीतिस्तवः by वेदान्तदेशिकः ।

ABHĪTISTAVAḤ by Vedāntadeśika.

Begins on fol. 26 (*a*) of the manuscript described under D. No. 11581.

Incomplete.

Contains verses 14 only in the middle.

Same work as that described under D. No. 9827.

D. No. 18143.

Pages, 4. Lines, 6, 7 on a page. Telugu. Slightly injured. Extent, 36 granthas.

न्यासविंशतिः by वेदान्तदेशिकः ।

NYĀSAVIMŚATIḤ by Vedāntadeśikaḥ.

Begins on fol. 28 (*a*) of the manuscript described under D. No. 11581.

Incomplete.

Contain verses 1 to 14 only.

Same work as that described under D. No. 10127.

D. No. 18144.

Pages, 2. Lines, 4 on a page. Telugu. Slightly injured. Extent, 6 granthas.

सुदर्शनषडक्षरीमन्त्रः ।

SUDARŚANAṢAḌAKṢARĪMANTRAḤ.

Begins on fol. 30 (*a*) of the manuscript described under D. No. 11581.

Complete.

Similar to the work described under D. No. 7567.

Foll. 30 (*b*), 31 32, contain Sundarśana Kavaca and mantra.

Beginning :

अस्य श्रीसुदर्शनषडक्षरीमहामन्त्रस्य अहिर्बुध्न्यो भगावानृषिः । अनुष्टुप् छन्दः । श्रीसुदर्शनरूपी श्रीमहाविष्णुर्देवता । आं बीजं, हं शक्तिः फट् कीलकं, श्रीसुदर्शनप्रसादसिद्ध्यर्थे जपे विनियोगः ।

अचक्राय विचक्राय सुचक्राय तथैव च ।
संचक्रायानुचक्राय ज्वालाचक्राय वै क्रमात् ॥

End :

ध्यानम्—

कोट्यन्ता ह्रिप्रकाशं त्रिभुवनमखिलमिति ।

D. No. 18145.

Pages, 14. Lines, 6, 7 on a page. Grantha. Slightly injured. Extent, 84 granthas.

बन्धश्लोकाः ।

BANDHAŚLOKĀḤ.

Begins on fol. 21 (*a*) of the manuscript described under D. No. 9359.

Gives examples of Artistic or skilful compositions in verses.

Complete.

Foll. 18, 19, 20, contain the Bandhās of verses.

Beginning :

कालीनाननन्नालीकाराधिताह्रिहिताधिराः ।
माया सामभसा यामा कापि दीप्रप्रदीपिका ॥

इति अर्धपादानुलोमप्रतिलोमम् ।

मयि ते पद्मभक्तेऽस्मिन् प्रसीद कमले हिते ।
तेजसा दह शक्ते त्वं क्षिप्रमुद्यदघं मम ॥

इति शृङ्गाटकचक्रम् ।

End :

सानुमानयमतीततारक-
स्सानुमानयमतीततारकः ।
सानुमानयमतीततारक-
स्सानुमानयमतीततारकः ॥

इति पादचतुरावृत्तिः ।

विराजमानादसमानभूमा
विराजमानादसमानभूमा
विराजमानादसमानभूमा
विराजमानादसमानभूमा ॥

पादचतुरावृत्तिः ।

इति कथयति कृष्णे गोपवृद्धा निदध्युः
शरणमशरणानां शाद्वलश्यामलाङ्गम् ।
पुलकितवनमालं पुष्पकिञ्जिल्कजालैः
पुरुषमचलशृङ्गे पुण्डरीकायताक्षम् ॥

D. No. 18146.

Pages, 5. Lines, 8 on a page. Grantha. Slightly Injured. Extent, 50 granthas.

श्यामलादण्डकः by कालिदासः ।

ŚYĀMALĀDAṆḌAKAḤ by Kālidāsa.

Begins on fol. 34 (*a*) of the manuscript described under D. No. 9359.

Complete.

Same work as that described under D. No. 10837 but the introductory verses added at the end.

D. No. 18147.

Page, 1. Lines, 9 on a page. Grantha. Slightly injured. Extent, 14 granthas.

सीतारामस्तोत्रम् ।

SĪTĀRĀMASTOTRAM.

Begins on fol. 57 (*a*) of the manuscript described under D. No. 4613.

Complete.

Same work as that described under D. No. 10418.

Fol. 57 contains Śrīrāmastotrakavaca, etc.

D. No. 18148.

Pages, 38. Lines, 5, 6 on a page. Grantha. Slightly injured. Extent, 380 granthas.

नामलिङ्गानुशासनव्याख्या by लिङ्गयसूरिः ।

NĀMALIṄGĀNUŚĀSANAVYĀKHYĀ by Liṅgayasūri.

Begins on fol. 25 (*a*) of the manuscript described under D. No. 2589 of the Tamil Descriptive Catalogue.

Incomplete.

Contains from 2nd Kāṇḍa to the end of 34th stanza of Vanauṣadhivarga.

Same work as that described under D. No. 1697.

D. No. 18149.

Pages, 10. Lines, 10, 11 on a page. Grantha. Injured. Extent, 225 granthas.

गीतगोविन्दम् by जयदेव ।

GĪTAGOVINDAM by Jayadeva.

Begins on fol. 10 (*a*) of the manuscript described under D. No. 4756.

Contains from 8th gītam of 2nd Sarga to the end of 10th Sarga. The last verse is incomplete.

Same work as that described under D. No. 11937.

D. No. 18150.

Pages, 17. Lines, 12 on a page. Grantha. Good. Extent, 308 granthas.

महान्यासः (पञ्चाङ्गरुद्रन्यासः) ।

MAHĀNYĀSAḤ (Pañcāṅgarudranyāsaḥ).

Begins on fol. 16 (*a*) of the manuscript described under D. No. 4756.

Incomplete.

Breaks off in Snānārcanābhiṣekavidhiḥ.

Fol. 24 (*b*) contains Śivasāṣṭottarastotra.

Same work as that described under R. No. 1261 wherein see for the beginning.

End :

अथातो रुद्रस्नानार्चनाभिषेकविधिं व्याख्यामः । आदौ देवतीर्थे स्नात्वा उदेत्य शुचिः प्रयतो ब्रह्मचारी शुक्लवासाः . . . . आत्मनि देवताः स्थापयेत् ।

*   *   *   *   *

अन्तास्तिष्ठत्वमृतस्य गोपाः यथालिङ्गमङ्गानि संमृज्य—

आराधितो मनुष्यैस्तु सिद्धैर्देवासुरादिभिः ।

आराधयामि भक्त्या त्वामनुगृहाण महेश्वर ॥

आयुराशास्ते आपः शुद्धन्तु मैनसो भूर्भुवः सुवो भूर्भुवः सुवः, आत्वा वहन्तु ॥

D. No. 18151.

Pages, 2. Lines, 12 on a page. Grantha. Slightly injured. Extent, 26 granthas.

भागवतश्लोकाः ।

BHĀGAVATAŚLOKĀH.

Verses from Srimad Bhāgavatam.

Incomplete.

Beginning :

वैयासिकेरितिवचस्तत्वनिश्चयमात्मनः ।
उपेयाय मतिं कृष्ण औत्तरेयस्सतीर्विधात् ॥

आत्मजायासुतागारपशुद्रविणबन्धुषु ।
राजा चापि कले नित्यं निरूढां ममतां जहौ ॥

End :

नमस्तस्मै भगवते वासुदेवाय वेधसे ।
पूर्विज्ञानमयं सौम्या यन्मुखांबुरुहासवम् ॥

एतदेवात्मभू राजन् नारदायानुपृच्छते ।
वेदगर्भोऽभ्यधात्साक्षाद्यदाह हरिरात्मनः ॥

D. No. 18152.

Pages, 14. Lines, 10, 11, 13 on a page. Grantha. Good. Extent, 315 granthas.

वेदसाराशिवसहस्रनामस्तोत्रम् ।

VEDASĀRAŚIVASAHASRANĀMASTOTRAM.

Begins on fol. 26 (*a*) of the manuscript described under D. No. 4756.

Complete.

Taken from Pādmapurāṇa.

Same work as that described under R. No. 142 (*c*).

Foll. 25 and 26 (*a*) contain Śaṅkarakavaca.

D. No. 18153.

Pages, 4. Lines, 10 on a page. Grantha. Slightly injured. Extent, 40 granthas.

विभूतिधारणमन्त्रः ।

VIBHŪTIDHĀRAṆAMANTRAH.

Begins on fol. 35 (*a*) of the manuscript described under D. No. 4756.

Complete.

Similar to the work described under D. No. 7227.

Beginning :

अस्य श्री विभूतिधारणमहामन्त्रस्य पिप्पलादो भगवानृषिः । देवी गायत्री छन्दः । कालाग्निरुद्रो देवता । अग्निरिति बीजं, भस्मेति शक्तिः । व्योमेति कीलकं, मम समस्तपापक्षयार्थं विभूतिधारणे विनियोगः । कालाय नमः अङ्गुष्ठाभ्यां नमः ।

End :

महाविष्णवे नमः पृष्ठे, महादेवाय नमः । अंसद्वये, शंकराय नमः, दक्षिणपार्श्वे शिवाय नमः वामपार्श्वे, पञ्चाक्षरेणाक्षनासिकाकर्णपादमूल-मध्यमणिबन्धेषु धारयेत् । आपः पुनन्त्विति मन्त्रेण हस्तौ प्रक्षाल्य जलं, पिबेत् ।

Fol. 35 (*a*) contains Ādityahṛdayastotramantraḥ.

D. No. 18154.

Pages, 5. Lines, 12 on a page. Grantha. Slightly injured. Extent, 75 granthas.

शिवकवचः ।

ŚIVAKAVACAH.

Begins on fol. 39 (*b*) of the manuscript described under D. No. 4756.

Complete.

Same work as that described under D. No. 7379 but with different end.

End :

वीक्षणेन मामालोकयालोकय, नरकभयान्मामुद्धरोद्धर, शिवकवचेन मामाच्छादयाच्छादय, मृत्युञ्जय त्र्यंबक सदाशिव नमस्ते नमस्ते ।

ऋषभ उवाच—

इत्येतत्परमं शैवं कवचं व्याहृतं मया ।
सर्वबाधाप्रशमनं रहस्यं सर्वदेहिनाम् ॥
यः सदा धारयेन्मर्त्यः शैवं कवचमुत्तमम् ।
न तस्य जायते कापि भयं शंभोरनुग्रहात् ॥

D. No. 18155.

Pages, 2. Lines, 10 on a page. Grantha. Slightly injured. Extent, 24 granthas.

कालाग्निरुद्रोपनिषत् ।

KĀLĀGNIRUDROPANIṢAT.

Begins on fol. 34 (*a*) of the manuscript described under D. No. 4756.

Same work as that described under D. No. 356, but different Ṛṣīyājñavalkya.

Complete.

Foll. 34 (*b*) and 35 (*a*) contain some mantrās.

D. No. 18156.

Pages, 2. Lines, 11 on a page. Grantha. Slightly injured. Extent, 25 granthas.

आत्ममानसिकपूजा ।

ĀTMAMĀNASIKAPŪJĀ.

Begins on fol. 37 (*o*) of the manuscript described under D. No. 4756.

Incomplete—Almost complete.

Same work as that described under D. No. 8608 but with some different verses at the end as given below.

End :

आत्मा त्वं गिरिजा मतिः परिजनाः प्राणाः शरीरं गृहं
पूजा ते विषयोपभोगरचना निद्रा समाधिस्थितिः ।
सञ्चारः पदयोः प्रदक्षिणविधिः स्तोत्राणि सर्वा गिरः
यद्यत्कर्म करोमि तत्तदखिलं शंभो तवाराधनम् ॥

* * * * *

* * * * *

यानि पापानि घोराणि जन्मान्तरशतेषु मे ।
तेषां सर्वविनाशाय शिवपूजां समारभे ॥

सौभाग्यविजयारोग्यसर्वैश्वर्यसमृद्धये ।
स्वर्गापवर्गसिद्ध्यर्थं . . . . ॥

D. No. 18157.

Pages, 15. Lines, 12 on a page. Grantha. Good. Extent, 285 granthas.

ब्रह्मसूत्रभाष्यम् by शङ्कराचार्यः ।

BRAHMASŪTRABHĀṢYAM by Śaṅkarācārya.

Begins on fol. 44 (*a*) of the manuscript described under D. No. 4756.

Breaks off in Samanvayādhikaraṇa.

Same work as that described under D. No. 4659.

D. No. 18158.

Pages, 19. Lines, 8, 10 on a page. Kannada. Slightly injured. Extent, 240 granthas.

दशाफलग्रन्थः ।

DAŚĀPHALAGRANTHAH.

Begins on fol. 13 (*a*) of the manuscript described under D. No. 13605.

Incomplete.

Similar to the work described under D. No. 13768.

Beginning :

अथाश्रयदशा—

लग्नादित्योडुपानामधिकबलवतां स्याद्दशायां ततोन्या
तत्केन्द्राधिष्ठितानामिह बहुषु पुनर्वीर्यतो वीर्यसाम्ये ।
बह्वायुर्वर्षदातुः प्रथममिनवशोनोदितश्चाब्दसाम्ये
भूमश्चान्तर्दशादिक्रमविधिमधुना शिष्यबोधप्रवृद्ध्यै ॥

त्रिषष्ठलाभेषु गतैः समस्तैः
सौम्यैः सुखार्थाश्च भवन्ति भूत्यै ।
तत्रैव पापैर्वयसोऽन्त्यकाले
जायार्थपुत्रादि भवन्ति सौम्यैः ॥

लग्नादुपचयसंस्था-
चन्द्राद्वा स्वगृह मूलतुङ्गस्थः ।
मित्रक्षेत्रगतो वा
फलमतिशयितं शुभं फलं दद्यात् ॥

उपचयराशौ नीचे
शत्रुक्षेत्रे च जन्मकाले स्यात् ।
यस्तु सद्द्यात्पूर्वं
फलमतिशयतो यथाकालम् ॥

इति श्रीदेवकीर्तिपक्षे ।

D. No. 18159.

Pages, 4. Lines, 9 on a page. Kannada. Slightly injured. Extent, 38 granthas.

बृहज्जातकम् by वराहमिहिरः ।

BRHAJJĀTAKAM by Varāhamihira.

Begins on fol. 7 (*a*) of the manuscript described under D. No. 13605.

Contains 10 and 23rd Adhyāyās.

Same work as that described under D. No. 13832.

D. No. 18160.

Palm leaf. 9½ × 1½ inches. Pages, 115. Lines, 10 on a page. Grantha. Slightly injured. Extent, 900 granthas.

आकाशभैरवकल्पः ।

ĀKĀŚABHAIRAVAKALPAH.

Contains 14 Upadeśās only.

Similar to the work described under D. No. 7747 but with some Tamil meaning for some Upadeśās.

Beginning :

अस्य श्रीशूलिनीदुर्गामहामन्त्रस्य दीर्घतमा ऋषिः । त्रिष्टुप् छन्दः । श्रीशूलिनी दुर्गा देवता । दुं बीजं, स्वाहा शक्तिः, शूलिनी दुर्गाप्रसाद-सिद्ध्यर्थे जपे विनियोगः । ह्रां अङ्गुष्ठाभ्यां नमः । ह्रीं तर्जनीभ्यां स्वाहा, ह्रूं मध्यमाभ्यां वषट् ।

End :

मरुद्बीजं अग्नि बीजश्च विलिख्य तद्बहिरष्टकोणेषु रुद्रवर्णं शैं, कारं तद्बहिः षोडशदलेषु प्रणवसहितममन्त्रं तद्बहिः भूकोणे कालार्णदकारं विलिख्य तद्बहिः साध्येन मायया लिपिना च वेष्टयेत् ।

पदमन्त्रं—

मासानि वातकालार्णगर्भक्षीणविवर्धनः ।
हुं स्वाहा जालरष्टग्रहुंफट् ज्वलशूलिना ॥

Colophon :

इति श्री आकाशभैरवकल्पे प्रत्यक्षसिद्धिप्रदे उमामहेश्वरसंवादे शंकरेण विरचिते शरभसाळुवपक्षिराजकल्पे दुर्गाप्रकरणं नाम प्रथमोपदेशः ॥

D. No. 18161.

Pages, 6. Lines, 8 on a page. Grantha. Injured. Extent, 20 granthas.

कीलकस्तोत्रम् ।

KĪLAKASTOTRAM.

Begins on fol. 16 (*a*) of the manuscript described under D. No. 6274.

Complete.

Similar to the work described under D. No. 6277.

Beginning :

अस्य श्रीकीलकस्तोत्रमहामन्त्रस्य विशुद्धज्ञान ऋषिः । अनुष्टुप् छन्दः । श्रीचण्डिका देवता, क्लां बीजं, क्लीं शक्तिः, क्लूं कीलकं, श्री चण्डिकाप्रसादसिद्ध्यर्थे जपे विनियोगः ।

End :

ऐश्वर्यं यत्प्रसादेन सौभाग्यारोग्यसंपदाम् ।
शत्रुहानिपरो मोक्षः क्रियते तन्न किञ्चनैः ॥
इदं स्तोत्रं पठित्वा तु महास्तोत्रं पठेन्नरः ।
. . . . चनोपेतां समस्तफलमश्नुते ॥

इति . . . समाप्तम् ।

D. No. 18162.

Pages, 70- Lines, 8 on a page. Grantha. Iinjured. Extent, 315 granthas.

ललितासहस्रनामस्तोत्रम् ।

LALITĀSAHASRANĀMASTOTRAM.

Begins on fol. 59 (*a*) of the manuscript described under D. No. 6274.

Complete.

Same work as that described under D. No. 9183 but with different beginning and Colophon as given below.

Beginning :

अगस्त्य उवाच—

अश्वानन महाबुद्धे सर्वशास्त्रविशारद ।
कथितं ललितादेव्याश्चरितं परमाद्भुतम् ॥
पूर्वंप्रादुर्भवो मातुस्तथा पट्टाभिषेचनम् ।
भण्डासुरवधश्चैव विस्तरेण त्वयोदितम् ॥

Colophon :

इति ब्रह्माण्डपुराणे उत्तरखण्डे हयग्रीवागस्त्यसंवादे ललिताख्याने स्तोत्रखण्डे ललितादेवीस्तोत्ररहस्यस्तोत्रसहस्रं नाम त्रयस्त्रिंशोऽध्यायः ।

D. Nō. 18163.

Pages, 16. Lines, 5, 6 on a page. Telugu. Good. Extent, 45 granthas.

गुरुपरम्परास्तोत्रम् ।

GURUPARAMPARĀṢTOTRAM.

Begins on fol. 26 (*a*) of the manuscript described under D. No. 206.

Complete.

Similar to the work described under R. No. 179,

Beginning :

श्री भावनार्यमहागुरवे नमः । श्रीमते रामनुजाय नमः । अस्मद् गुरुभ्यो नमः । अस्मत्परमगुरुभ्यो नमः । अस्मत्सर्वगुरुभ्यो नमः । श्रीमते रामानुजाय नमः । श्रीपराङ्कुशदासाय नमः । श्रीमद्यामुनमुनये नमः । श्रीराममिश्राय नमः । श्रीपुण्डरीकाक्षाय नमः ।

* * * * *

अस्मद्देशिकमस्मदीयपरमाचार्यानशेषान् गुरून्
श्रीमल्लक्ष्मणयोगिपुंगवमहापूर्णौ मुनिं यामुनम् ।
रामं पद्मविलोचनं मुनिवरं नाथं शठद्वेषिणं
सेनेशं श्रियमिन्दिरासहचरं नारायणं संश्रये ॥

End :

श्रियं श्रीरङ्गराजस्य महिषीमाश्रयाम्यहम् ।
अम्मवार्ले गारि तनियन् ॥

श्रीस्तनाभरणं तेजः श्रीरङ्गेशयमाश्रये ।
चिन्तामणिमिवोद्वान्तमुत्सङ्गेऽनन्तभोगिनः ॥

भावनाचार्यलवारि - तानियन् ।

D. No. 18164.

Pages. 12. Lines, 5 on a page. Grantha. Good. Extent, 65 granthas.

द्रव्यसंग्रहः with व्याख्या ।

DRAVYASAṄGRAHAḤ with commentary.

Begins on fol. 118 of the manuscript described under D. No. 11858.

Incomplete.

Same text as that described under D. No. 5167.

Beginning :

षड्द्रव्यसमुदायेऽस्मिन् लोके द्रव्यक्षेत्रकालभवभावभेदभिन्न· पञ्चविधसंसारे चङ्क्रम्यमाणजीवानां जीवस्वरूपपरिज्ञानरहितानां कारुण्यबुद्ध्या सविषयीभूतजीवाजीवद्रव्यस्वरूपप्रतिपादकमिमं यद्द्रव्यसंग्रह-

नामानं ग्रन्थमारचयन् भगवान् नेमिचन्द्रसिद्धान्तदेवः सैद्धान्तिकचक्रवर्ती तदादौ निर्विघ्नतः शास्त्रपरिसमाप्त्यादिचतुर्विधफलमवलोक्येष्टदेवताविशेषं नमस्कुर्वन्निदं सूत्रमाह—

जीवमजीवं दं वं जिणवरव सहेण जेणणिंदिठम् ।
देविं दविं दपं दं वंदे तं संवदा सिरसा · · · · ।

End :

तस्य जीवस्योपयोगद्वयमाह—

उपजोगो दुविधं पोदं सणणाणीच दीसणी चदुदा ।
चं खु अचंखु ओहीदं सणमथकेवलं णेयि ॥

उपयोगो द्विविकल्पः, दर्शनश्च ज्ञानं च कत्थी चक्षुरचक्षुषी अधिदर्शनं, अथ केवलं ज्ञेयं, दर्शनं ज्ञानं चेत्युपयोगो द्विविकल्पः । तत्र दर्शनं दर्शनोपयोगः चतुर्था चतुष्प्रकार स्यात् । चक्षुषो चक्षुर्द(र्श)नमचक्षुर्दर्शनामिति द्वावप्युपयोगौ सा व्यावहारिकप्रत्यक्षे दर्शनोपयोगौ ।

D. No. 18165.

Pages, 7. Lines, 6 to 8 on a page. Grantha. Good. Extent, 70 granthas.

भूगोलनिर्णयः with व्याख्या by वेदान्तदेशिक ।

BHŪGOLANIRṆAYAḤ with Commentary by Vedāntadeśika.

Begins on fol. 1 (*a*) of the manuscript described under D. No. 4974.

Complete.

Similar to the work described under D. No. 13465.

Beginning :

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी ।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि ॥

पञ्चाशत्कोटिभिः स्यान्मितमवनितलं योजनानां तथाहि
स्याज्जम्बूद्वीपमेकं नियुतमुदधिना तावता वेष्टितं तत् ।
लक्षद्वीपेन सोपि द्विगुणविततिना तावतेष्वब्धिनासौ
द्वीपाद्द्वैगुण्यभाजः स्वसदृगुदधिभिः संवृता एवमवे ॥

मितं, परिमितं, नियुतं लक्षं तावता एकलक्षसंख्याकेन सोपि जंबुद्वीपोऽपि पुंनपुंसकं, द्विगुणविततिना द्विलक्षविस्तारेण ।

End :

अण्डभित्तिपरिमाणमारभ्य पूर्वपूर्वापेक्षया उत्तरोत्तरं दशगुणितमित्यर्थः । अण्डं, अप्तेजोवाय्वाकाशाहंकारमहदव्यक्ताख्यावरणसप्तक वेष्टितं ।

Colophon :

इति कवितार्किकसिंहस्य . . . . भूगोलसमकं
संपूर्णम् ।

D. No. 18166.

Pages, 2. Lines, 4 on a page. Grantha. Good. Extent, 7 granthas.

नरचक्रम् ।

NĀRĀCAKRAM.

Begins on fol. 15 (*a*) of the manuscript described under D. No. 4974.

Incomplete.

Beginning :

एकं दशापक्षतया कनिष्ठे द्वौ षष्ठरुद्रोऽपि अनामिकायाम् ।
त्रिसप्तमं द्वादशमध्यमं च चतुर्वसुर्विश्वभृतार्जिनीषु ॥

End :

वामहस्तैकदारिद्र्यं चक्रस्यास्य फलं लभेत् ।

ग्रामनामाक्षरनक्षत्रमारभ्य शिरोमुखहृदादा
वभिजित्सहाष्टाविंशतिं ऋक्षं लिखेत् ।

D. No. 18167.

Pages, 2. Lines, 7 on a page. Grantha. Slightly injured. Extent, 11 granthas.

यज्ञोपवीतप्रतिष्ठाविधिः ।

YAJÑOPAVĪTAPRATIṢṬHĀVIDHIḤ.

Begins on fol. 17 (*a*) of the manuscript described under D. No. 12062.

Complete.

Similar to the work described under D. No. 2850.

Beginning :

प्राणानायम्य, यज्ञोपवीतप्रतिष्ठां करिष्ये इति संकल्प्य, ओं भूः यज्ञोपवीतं, प्रतिष्ठापयामि, ओं भुवः यज्ञोपवीतं प्रतिष्ठापयामि ।

End :

अर्घ्यपाद्यादिनैवेद्यान्तं कृत्वा, आसनेनेत्यादि चतुर्भी ऋग्भिः सूर्याय प्रदर्श्य, यज्ञोपवीतं स्पृष्ट्वा गायत्रीमष्टोत्तरशतमष्टाविंशतिवारं वा जपित्वा त्र्यंबकं यजामहे इति सकृज्जपित्वा यज्ञोपवीतमिति धारयेत् ।

Fol. 18 (*a*) contains Tarpaṇa.

D, No. 18168.

Pages, 11. Lines, 6 on a page. Grantha. Good. Extent, 75 granthas.

पिष्टपशुविधानम् ।

PIṢṬAPAŚUVIDHĀNAM.

Begins on fol. 26 (*a*) of the manuscript described under D. No. 2976.

Similar to the work described under R. No. 4697.

Complete.

Beginning :

शान्तिपर्वणि नारायणीये एकोनचत्वारिंशदधिकत्रिशततमाधिकारे—

भीष्मः उवाच—

अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।
ऋषीणां चैव संवादं त्रिदशानां च भारत ॥

अजेन यष्टव्यमिति प्राहुर्देवा द्विजोत्तमान् ।
स च छागोऽप्यजो ज्ञेयो नान्यः पशुरिति स्थितिः ॥

ऋषय ऊचुः—

बीजैर्यज्ञेषु यष्टव्यमिति वै वैदिकी श्रुतिः ॥
अजसंज्ञानि बीजानि छागान्नो हन्तुमर्हथ ॥

End :

सर्वेषामेव शास्त्राणामेकाधिकारिगोचरताया वाचस्पतिनापि दुर्वचतया नित्यतया प्राप्तहिंसागर्भयागादिकमपि नपरमैकान्तिनमधिकरोति । परमैकान्तिनमुद्दिश्यान्यादृशानामेव नित्यनैमित्तिकादिकर्मणां तत्परशास्त्रैरुद्बुद्ध्यमानत्वात्तत्र चेदृशहिंसागर्भयागादीनामचोदनाच्च । तस्मादधिकारिवैचित्र्येण सर्वं समञ्जसमिति न किञ्चिदपि संकटं पश्यामः इति संक्षेपः ।

D. No. 18169.

Pages, 38. Lines, 5 on a page. Telugu. Slightly injured. Extent, 150 granthas.

गीतगोविन्दम् by जयदेवः ।

GĪTAGOVINDAM by Jayadeva.

Begins on fol. 29 (*a*) of the manuscript described under D. No. 4396.

Wants 3 verses in the end, otherwise complete.

Same work as that described under D. No. 11937.

D. No. 18170.

Pages, 6. Lines, 6, 7 on a page. Grantha. Injured. Extent, 32 granthas.

सुदर्शनपाञ्चजन्यप्रतिष्ठाविधिः ।

SUDARŚANAPĀÑCAJANYAPRATIṢṬHĀVIDHIḤ.

Begins on fol. 1 (*a*) of the manuscript described under D. No. 305.

Complete.

Similar to the work described under D. No. 3854

Beginning :

परावरज्ञः सदाचार्यो धात्रीकल्पेन लिप्ताङ्गः पुण्यतीर्थे स्नातः पूर्वाह्निकनित्यकर्माणि कृत्वा पूर्वेद्युः ताम्बूलदक्षिणादिभिः सत्कृतैः श्री वैष्णवैराशिषो वाचयित्वा अस्यां शुभतिथौ ।

End :

तत आचार्यं धान्यवस्त्रभूषणादिभिः तोषयेत् । एवं प्रतिष्ठाविधिः । प्रोक्षणपक्षेतु आधारशक्त्यादिहोममन्त्राहुतिश्च वर्जयेत् ।

Colophon :

इति सुदर्शनपाञ्चजन्यप्रतिष्ठाविधिः ।

D. No. 18171.

Pages, 5. Lines, 5 on a page. Grantha. Injured. Extent, 24 granthas.

मूलमन्त्रदशायोजना ।

MŪLAMANTRADAŚAYOJANĀ.

Begins on fol. 4 (*a*) of the manuscript described under D. No. 305.

This gives different explanation or Commentary to the Mūla Mantra.

Complete.

Beginning :

मूलमन्त्रदशायोजना—

एकवाक्यत्वे प्रणवप्रतिपाद्याय नारायणाय नमः । इदानीं नम्यत इति नम इति भावव्युत्पत्त्या कायवृत्तिपरत्वं । · · नामयतीति नमः । करणव्युत्पत्त्या उपायपरत्वं । आहत्य योजनाद्वयम् " २ ॥

End :

शेषद्वयं उत्तरखण्डवत् पुरुषार्थप्रार्थनार्थं । इदानीमुपायपुरुषार्थौ शाब्दौ, स्वरूपमार्थं ॥ ४ ॥ प्रणवस्वरूपं नमसि भरसमर्पणं, तृतीयपदे · · · · · पुरुषार्थ प्रार्थना । इदानीं स्वरूपोपायपुरुषार्थास्त्रयो· ऽशाब्दाः ॥ ५ ॥

D. No. 18172.

Pages, 6. Lines, 5 on a page. Grantha. Injured. Extent, 20 granthas.

नारायणोपनिषत् ।

NĀRĀYAṆOPANIṢAT.

Begins on fol. 7 (*a*) of the manuscript described under D. No. 305.

Complete.

Same work as that described under D. No. 561.

D. No. 18173.

Pages, 2. Lines, 6 on a page. Grantha. Injured. Extent, 9 granthas.

हयग्रीवोपनिषत् ।

HAYAGRĪVOPANIṢAT.

Begins on fol. 12 (*a*) of the manuscript described under D. No. 305.

Complete.

Similar to the work described under D. No. 851.

Beginning :

भद्रं कर्णेभिरिति शान्तिः ।

हयग्रीवमेकाक्षरेण ब्रह्मविद्यां प्रवक्ष्यामि, ब्रह्मा महेश्वरात्, ब्रह्मणः सङ्कर्षणः, सङ्कर्षणात् नारदः, नारदात् व्यासः, व्यासो लोकाना प्रयच्छति. अकारो, सकारो, औकारो, त्रयं भवति, त्रयेणैकस्वरूपो भवति ।

End :

वाक्सिद्धिं श्रीसिद्धिं धियं, मेधानां, प्रवर्षमेधानां वर्षं साम्राज्येन सिद्धं, कुरु कुरु स्वाहा । य इमां ब्रह्मविद्यामेकादश्यां पठेत् हयग्रीवेण जप्तो महानुभावो भवति ।

Colophon :

इत्यथर्वणवेदे मन्त्रखण्डे पूर्वसंहितायामित्युपनिषत् ।

। हयग्रीवोपनिषत्समाप्ता ।

D. No. 18174.

Page, 1. Lines, 7 on a page. Grantha. Injured. Extent, 6 granthas

देशिकोपनिषत् ।

DEŚIKOPANIṢAT.

Begins on fol. 13 (*a*) of the manuscript described under D. No. 305.

Though this Upaniṣad is a part of Dvayopaniṣad described under D. No. 548, according to the colophon given hereunder it seems to be a separate work.

This contains a vivid account of this essential qualifications that are necessary to make an ideal guru or Āchārya.

Beginning and End :

आचार्यो वेदसंपन्नो विष्णुभक्तो विमत्सरः ।
मन्त्रज्ञो मन्त्रभक्तश्च सदा मन्त्राश्रयः शुचिः
गुरुभक्तिसमायुक्तो पुरुषज्ञो विशेषतः ।
एवं लक्षणसंपन्नो गुरुरित्यभिधीयते ॥
गुशब्दस्त्वन्धकारः स्यात् रुशब्दस्तन्निरोधकः ।
अन्धकारनिरोधित्वाद्गुरुरित्यभिधीयते ।
गुरुरेव परं ब्रह्म गुरुरेव परा गतिः ।
गुरुरेव परा विद्या गुरुरेव परायणम् ॥
गुरुरेव परा काष्ठा गुरुरेव परं धनम् ।
यस्मात्तदुपदेष्टासौ तस्माद्गुरुतरो गुरुः ॥

Colophon :

। इति देशिकोपनिषत् समाप्ता ।

D. No. 18175.

Pages, 2. Lines, 7 on a page. Grantha. Injured. Extent, 5 granthas.

सुदर्शनोपनिषत् ।

SUDARŚANOPANIṢAT.

Begins on fol. 13 (*a*) of the manuscript described under D. No. 305.

Complete.

Similar to the work described under D. No. 826.

Beginning and End :

पूर्णमद इति शान्तिः ।

यज्ञोपवीती कृतचक्रधारी
यो ब्रह्मवित् ब्रह्मविदो मनीषा ।
हिरण्यमादाय सुदर्शनञ्च
कृत्वा वह्निं स्वयमुपैति युक्तम् ? ॥

स्त्रीशूद्रास . . . म्यां धारयेत् । तस्माद् गर्भेण जायते, ब्राह्मणस्य शरीरं जायते । विष्णुं भजन्ति, नासादि केशपर्यन्त मूर्ध्वपुण्ड्रं धारयेत् । आचार्यस्य सन्मुखं प्रपद्ये । तस्माद् वैकुण्ठ न पुनरागमनं, सालोक्यं सारूप्यं सामीप्यं सायुज्यं गच्छति सायुज्यं गच्छति ।

Colophon :

इति सुदर्शनोपनिषत् ।

D. No. 18176.

Pages, 4. Lines, 6 on a page. Grantha. Injured. Extent, 12 granthas.

गीताध्यानम् ।

GITĀDHYĀNAM.

Begins on fol. 1 (*a*) of the manuscript described under D. No. 7747.

Incomplete. Contains a few stanzas.

Same as the stanzas given in the beginning of the work described under D. No. 2048.

Beginning :

शुक्लांबरधरं विष्णुं शशिवर्णं चतुर्भुजम् ।
प्रसन्नवदनं ध्यायेत् सर्वविघ्नोपशान्तये ॥

प्रपन्नपारिजाताय वेत्रतोत्रैकपाणये ।
ज्ञानमुद्राय कृष्णाय गीतामृतदुहे नमः ॥

करकलितपरमात्मा मुद्रिभावः (निदर्शितात्ममुद्रः)
परिकलितोच्चसबर्हिबर्हचूडः ।
इतर(कर)गृहीत त्वावेत्रतो गोत्रवेषः (योक्तृतोत्रो)
मम हृदि सन्निधिमातनोतु शौरिः (?)

End :

वाचकः प्रणवो यस्य क्रीडावस्त्वखिलं जगत् ।
श्रुतिराज्ञा वपुर्ज्ञानं तं वन्दे देवकीसुतम् ॥
आकाशात् पतितं तोयं [यथा गच्छति सागरम्] ।

[सर्वदेवनमस्कारः केशवं] प्रति गच्छति ।
चतुर्णामपि वर्णानां सारमुद्धृत्य विष्णुना ॥

D. No. 18177.

Pages, 13. Lines, 4 on a page. Grantha. Slightly injured. Extent, 38 granthas.

गुरुपरम्परास्तोत्रम् ।

GURUPARAMPARĀ STOTRAM.

Begins on fol. 41 (*a*) of the manuscript described under D. No. 305.

Complete.

Same work as that described under D. No. 18098 with one more additional stanza in the end as given below.

End :

भाष्यं चेद्व्यवृणोत्स्वयं यतिपतिर्व्याख्यानवाचां तथा
गांभीर्यादनवास्थितिर्मितमतिर्दूरे जनस्तद्गिराम् ।
प्रष्टव्यः कथमीश्वरः स हि न नः प्रत्यक्षरूपो दृशां
तद्भाष्यं स च भाष्यकृत् स च हरिः सम्यक् प्रसीदन्तु नः ।

D. No. 18178.

Pages, 7. Lines, 6 on a page. Grantha. Injured. Extent, 29 granthas.

संप्रोक्षणाविधिः ।

SAMPROKṢAṆAVIDHIḤ.

Begins on fol. 1 (*a*) of the manuscript described under D. No. 2825.

Complete.

Similar to the work described under R. No. 1343 (*f*).

Beginning :

संप्रोक्षणविधिं वक्ष्ये गृहार्चनविधौ हरेः ।
येन संप्रोक्षिते बिंबे सान्निधत्ते सदा हरिः ॥

पूर्वस्थापितबिम्बस्य न पुनःस्थापनं स्मृतम् ।
स्थापने तु महान् दोषः तस्य संप्रोक्षणं स्मृतम् ॥

अङ्गभङ्गादिसन्धाने प्रतिष्ठां पुनराचरेत् ।

End :

ताम्बूलं च तदा दद्याद्वाग्नौ होमं समाचरेत् ।
पुंसूक्तेन विधानेन जुहुयात् षोडशाहुतीः ॥

मूर्तिमन्त्रेण [च] सकृत् हुत्वाग्निं परिषिच्य च ।
विष्वक्सेनं प्रपूज्याथ देवाग्रे गुरुमर्चयेत् ॥

ब्रह्मणान् भोजयेत् पश्चादाशिषो वाचयेत्ततः ॥

Colophon :

प्रतिष्ठाविधिः समाप्ता ।

D. No. 18179.

Pages, 3. Lines, 6 on a page. Grantha. Injured. Extent, 15 granthas.

भूगोलनिर्णयः by वेदान्तदेशिकः ।

BHŪGOLANIRṆAYAḤ by Vedāntadeśikā.

Begins on fol. 11 (*a*) of the manuscript described under D. No. 2825.

Same text as that described under D.Nos. 13465 and 18165, wherein see for the beginning.

End :

शैलैः पातालरन्ध्रैर्नवदशशतकैः सप्तभिर्भूरधोऽधो
मध्ये मध्ये सहस्रैर्भवति हितदधः शेषलोको जलं च ।
तस्याधो नारकाःस्युस्तदिदमिषुदशः कोटयः किञ्चिदूनाः
पञ्चाशत्कोठितुङ्गा विततमिदमतो ब्राण्डभित्तिस्तु कोटिः ॥

Colophon :

कविताार्कक

D. No. 18180.

Palm leaf. $11\frac{1}{2} \times 1$ inches. Pages, 16. Lines, 5, 6, 7 on a page. Grantha. Injured. Extent, 80 granthas.

धर्मशास्त्रविषयः ।

DHARMAŚĀSTRAVIṢAYAḤ.

Begins on fol. 8 (*a*). It deals with the duties of men in general and of the various castes.

Beginning :

स्ववर्णाश्रमयोग्यानि नित्यकर्माणि चाचरेत् ।
अन्यथा पतितो मर्त्यः कर्मचण्डालतां व्रजेत् ॥

उत्तमो जन्मचण्डालः सचाण्डालोऽधमाधमः ।
तस्माद्योग्यः पूर्वमुक्तो विष्णुकीर्तनतो भवेत् ॥

पुनः संस्कारतो योग्यो भवेद्यस्माद्द्वितीयकः ।

अत्रविषये भगवता स्वेनैवोक्तं,—

अहिंसा सत्यमक्रोधो क्षान्तिरार्जवमेव च ।
ध्यानं दमश्च यज्ञश्च ब्राह्मं कर्म स्वभावजम् ॥

End :

यतिशेषं स्त्रीशेषं वै न भक्षयेत् ।
भक्षयेद्यदि मोहेन ब्रह्मकूर्चं पिबेत्स्वयम् ॥

सकञ्चुकं यतिं दृष्ट्वा विकञ्चुकसुवासिनीम् ।
दृष्ट्वा विवाहे विश्वस्तां साम्बर सद्य आप्लवेत् ।

वाहनस्थं यतिं दृष्ट्वा सचेलस्नानमाचरेत् ।
माठापत्ययतिस्पर्शात् सवासा जलमाविशेत् ॥

योगसिद्धेः पूर्वमेव मरणं संभवेत् ? ।
कुर्यात् प्रपदनं युक्ते तेन दोषं लभेत सः ॥

Foll. 1 to 7 contain some mantras and Auṣadhās.

Des. Cat.—20A

D. No. 18181.

Pages, 88. Lines, 7, 8 on a page. Grantha. Injured. Extent, 1,408 ganthas.

मुण्डकोपनिषद्भाष्यम् by शङ्कराचार्यः ।

MUṆḌAKOPANIṢADBHĀṢYAM by Śaṅkarācārya.

Begins on fol. 119 (*a*) of the manuscript described under D. No. 2285.

Complete.

Some leaves are broken.

Same work as that described under D. No. 719.

D. No. 18182.

Pages, 42. Lines, 6, 7 on a page. Grantha. Injured. Extent, 588 granthas.

काठकोपनिषद्भाष्यम् by शङ्कराचार्यः ।

KĀṬHAKOPANIṢADBHĀṢYAM by Saṇkarācarya.

Begins on fol. 164 (*a*) of the manuscript described under D. No. 2285.

Incomplete.

Contains up to the end of 4th mantra of 2nd Valli of 2nd Adhyāya.

Same work as that described under D. No. 342.

D. No. 18183.

Palm leaf. 10½ × 2 inches. Pages, 21. Lines, 8, 10 on a page. Nandinagari. Good. Old. Extent, 450 granthas.

राजकालनिर्णयः by विद्यारण्यः ।

RĀJAKĀLANIRṆAYAḤ by Vidyāraṇya.

Complete.

Same work as that described under D. No. 12772.

D. No. 18184.

Pages, 5. Lines, 6 on a page. Telugu. Injured. Extent, 30 granthas.

भ्रमराम्बिकापूजाविधिः ।

BHRAMARĀMBIKĀPŪJĀVIDHIḤ.

Begins on fol. 13 (*b*) of the manuscript described under D. No. 2481.

Incomplete.

Leaves are broken.

Contains the procedure of worshipping the Goddess Bhrama-rāmbikā.

Beginning :

पूजाक्रममधीश्वर्याः शृणु पार्वति सांप्रतम् ।
श्रीशैले भ्रमरांबायाः कर्तव्यं सिद्धिकांक्षिभिः ॥

दिविषत्कोटिकोटीव कोटिसंघृष्टपादुकाम् ।
आवाहयामि देवि त्वां स्फुरितां भ्रमरांबिके ॥

स्वयमावाहिताशेषतेजःस्थगितादिक्तटम् ।
तटिनीमनुकम्पायाः कलये त्वामधीश्वरि ॥

* * * * *

इदमाचमनीयाम्बु, जगदम्बे मया कृतम् ।
गाङ्गमङ्गीकुरुष्वास्मान् कृतार्थीकर्तुमीश्वरि ॥

* * * * *

आकलय्य कृतार्थान्नः कुरु श्रीभ्रमरांबिके ।
अङ्गपूजां ततः कुर्यादिति देव्या यथाक्रमम् ॥

End :

पुष्पाञ्जलिरियं मातर्भक्त्यान्ते क्रियते मया ।
. . . . श्रीभ्रमरांबिके ॥

सेवायै ते मयानीतं परमेतत्सामाचरम् ॥

आकलय्य . . . . . (भ्र)मरांबिके ।
राजोपचारानन्यांस्ते मया भक्त्या समर्पितान् ॥

D. No. 18185.

Pages, 6. Lines, 4 on a page. Telugu. Good. Extent. 25 granthas.

ऊर्ध्वपुण्ड्रलक्षणम् ।

ŪRDHVAPUṆḌRALAKṢAṆAM.

Begins on fol. 28 (*a*) of the manuscript described under D. No. 5708.

Complete.

Similar to the work described under D. No. 2835.

Beginning :

नासादिकेशपर्यन्तं सारं साग्रं तु विन्यसेत् ।
सान्तरालं तु कर्तव्यं कर्तव्यं वैष्णवैर्बुधैः ।
तदेव भवनं विष्णोर्देवि वैकुण्ठसंज्ञितम् ।
अच्छिद्राण्यूर्ध्वपुण्ड्राणि ये कुर्वन्ति नराधमाः ।
अवलोक्य मुखं तेषामादित्यमवलोकयेत् ।

*　　　*　　　*　　　*　　　*

श्रीपार्वत्युवाच—

लक्षणं पुण्ड्रमुद्राणां कटिस्थानादिकं फलम् ।
मृत्तिकादेवतामानं केन धार्यं वदस्व मे ।

ईश्वर उवाच—

देव एवं मया पृष्टो पुरा प्राहाब्जसंभवः ।
तत्क्रमं देवि वक्ष्यामि सावधानमनाः शृणु ॥

ऊर्ध्वपुण्ड्रविधिं वक्ष्ये मुद्राणां स्थानदेवताः ।
मृदं च मानसंख्या च प्रतिवक्ष्यामि तत्क्रमात् ॥

End :

द्वादश ऊर्ध्वपुण्ड्राणि श्रीवत्सं चापि धारयेत् ।
चिह्नं तु वैष्णवं धार्यं श्रीवत्सं विन्यसेत्स्तने ॥

तत्र सङ्कर्षणं चापि वामदेवस्य मूर्धकः ।
बाहूदरे षडङ्गुल्यं पञ्चाङ्गुल्यं तु वक्षसि ॥

पृष्ठे कण्ठे च चत्वारि फाले नासादि केशवम् ॥
नासादि केशपर्यन्तं दण्डाकारं तु विन्यसेत् ।

D. No. 18186.

Palm leaf. 15 and 9¼ × 1¼ inches. Pages, 8. Lines, 5 on a page. Nandinagari. Slightly injured. Extent, 55 granthas.

द्वात्रिंशदपराधक्षमापणस्तोत्रम् ।

DVĀTRIMŚADAPARĀDHAKṢAMĀPAṆASTOTRAM.

Begins on fol. 1 (*a*). The other works herein are—

(1) Gaṅgāṣṭakam, 6 (*a*).
(2) Gaṅgāstotram, 7 (*a*) and 8 (*b*).
(3) Cāturmāsyavratam, 10 (*a*).
(4) Cāṭuślokāḥ.
(5) Rathasaptomīślokāḥ, 14 (*b*).
(6) Śivadvādaśanāmāni, 15 (*a*).
(7) Durgāstotram, 15 (*b*).
(8) Aṣṭottaraśatadivyadeśanāmāni, 16 (*b*).
(9) Tulasīkavacaḥ, 18 (*b*).
(10) Aṣṭottraśatadivyadeśanāmāni, 24 (*a*).
(11) Śivakavacaḥ, 29 (*a*).
(12) Pūjāvidhiḥ, 34 (*a*).
(13) Garuḍakavacaḥ, 42 (*a*).
(14) Indrākṣīstotram, 44 (b).
(15) Mahālakṣmipūjā, 46 (*a*).
(16) Daśaślokīmantraḥ, 47 (*a*).
(17) Indrākṣīstotram, 49 (*a*).
(18) Ṛṣipañcamīvratam, 50 (*a*).
(19) Ragunāthapañcaratnam, 52 (*a*).
(20) Kṛṣṇāṣṭakam, 53 (*b*).
(21) Mukundāṣṭakam, 55 (*a*).
(22) Sudarśanāṣṭakam, 56 (*a*).
(23) Rāmakavacḥ, 58 (*b*).
(24) Nārāyaṇavarma, 62 (*a*).
(25) Kṛṣṇāṣṭottaraśatanāmastotram, 66 (*a*).
(26) Sūryastavaḥ 65, (*a*).
(27) Rāmāvarṇamālikastvaḥ, 71 (*a*).
(28) Veṅkaṭeśabhujaṅgastotram, 68 (*a*).
(29) Ādityahṛdayam, 75 (*a*).

This is a stotra invoking the God Viṣṇu to pardon for commiting sins, in the form of omissions and commissions.

Complete.

Beginning :

नापराधश्चेरद्यापि विष्णोर्देवस्य चाक्रिणः ।
इति त्वयोदितं पूर्वं तानाचक्ष्व ममाधुना ॥

ज्ञात्वैव विनिवर्तन्ते पण्डिताः पापपद्धतेः ।
तस्मात्ते कति वा चाहुर्माधवो य[पि] (?) न तुष्यति ॥

अपराधसहस्राणि क्रियन्तेऽहर्निशं मया ।
वक्तुं तानिमान् लोके तस्मान्मुख्यां शते बले (?) ॥

यज्ज्ञात्वा विनिवर्तन्ते पण्डिताः पापपद्धतेः ।
निवृत्तानां (?) नचायान्ति तद्विष्णोः परमं पदम् ॥

अस्नात्वा देवपूजायाः करणं शङ्कया विना ।

*　　*　　*　　*　　*

एकादश्यां जागरणे पठेन्नामसहस्रकम् ।
अपराधसहस्राणि क्षमते तस्य केशवः ॥

द्वात्रिंशात्तत्र मुख्यास्ते वाराहे विष्णुनोदिताः ।

वर्जयेत्तान् प्रयत्नेन विष्णुभक्तो विशेषतः ।
तिर्यक्पुण्ड्रधरो भूत्वा अकृत्वा दन्तधावनम् ।

End :

अप्रक्षालितपादो यः प्रविशेन्मम मन्दिरम् ।

परमं परिधानीयं परिधायार्चयेत्तु माम् ।
क्रोपयुक्तं कथं कर्म न कोद्धा न् च विघ्नकृत् ॥

*　　*　　*　　*　　*

कुसुंबैरडतैलेन दीपं मह्यं निवेदयेत् ।
द्वापराधान् राजेन्द्र! द्वात्रिंशन्न क्षमामि तान् ॥

Colophon :

इति वराहपुराणे द्वात्रिंशापराधस्तोत्रं संपूर्णम् ।

Fol. 5 (*a*) contains Śatāparādhastotra taken from Garuḍapurāṇa.

D. No. 18187.

Pages, 3. Lines, 6 on a page. Nandinagari. Slightly Injured. Extent, 18 granthas.

गङ्गाष्टकम् by वाल्मीकिः ।

GAṄGĀṢṬAKAM by Vālmīkiḥ.

Begins on fol. 6 (*a*) of the manuscript described under last D. No. 18186.

Complete.

Same work as that described under D. No. 9370.

D. No. 18188.

Pages, 4. Lines, 6 on a page. Nandinagari. Slightly injured. Extent, 26 granthas.

गङ्गास्तोत्रम् ।

GAṄGĀSTOTRAM.

Begins on fol. 7 (*a*) of the manuscript described under D. No. 18186.

Complete.

Same work as that described under D. No. 9382 with the name of Bhāgīrathīstotram.

D. No. 18189.

Pages, 3. Lines, 6 on a page. Nandinagari. Good. Extent, 15 granthas.

गङ्गास्तवः by जयदेवः ।

GAṄGĀSTAVAḤ by Jayadevaḥ.

Begins on fol. 8 (*b*) of the manuscript described under D. No. 18186.

Complete.

Same work as that described under R. No. 226 (c) with slight different reading.

D. No. 18190.

Pages, 7. Lines, 5, 6, 7 on a page. Nandinagari. Slightly injured, Extent, 55 granthas.

चाटुश्लोकाः ।

CĀṬUŚLOKĀḤ.

Begins on fol. 11 (*a*) of the manuscript described under D. No. 18186.

Witty stanzas.

Incomplete.

Beginning :

. . . मानो हि महतां धनम् ।
प्रस्तावसदृशं वाक्यं स्वभावसदृशं वयः ।
आत्मशक्तिसमः कोप उच्छ्रयो जातिहेतुकः ।

अद्यापि तां कनकचम्पकदामगौरीं
फुल्लारविन्दनयनां तनुरोमराजिम् ।
सुप्तोत्थितां नयनविह्वललालसाङ्गीं
विद्यां प्रमा(द)गलि(ता)मिव चिन्तयामि ॥

* * * * *

अद्यापि नोज्झति हरः किल कालकूटं
कूर्मो बिभर्ति धरणीं खलु पृष्ठभागे ।
अम्भोनिधिर्वहति दुस्सहबाडवाग्नि-
मङ्गीकृतं सुकृतिनः परिपालयन्ति ॥

End :

ताम्बूलाग्रे निवसति रमा दक्षिणे वागधीशः
पृष्ठे ज्येष्ठा . . . . . ।
मध्ये विष्णुर्बहिरुडुपतिः शङ्करश्च त्रिकोणे
मूले मृत्युर्वसति मदनः सर्वतो नागवल्ल्याः ॥

Fol. 10 contains Cāturmāsyavratavacanāni.

D. No. 18191.

Pages, 2. Lines, 7 on a page. Nandinagari. Slightly injured. Extent, 13 granthas.

रथसप्तमीस्नानश्लोकाः ।

RATHASAPTAMĪSNĀNAŚLOKĀḤ.

Begins on fol. 14 (*b*) of the manuscript described under D. No. 18186.

Complete.

Beginning :

अर्कपत्र ! नमस्तेऽस्तु मार्ताण्डस्य सदाप्रिय
पुण्यायां रथसप्तम्यां भक्त्या देवमनुस्मरन् ॥
अर्कं निधाय शिरसि स्नानं प्रातः समाचरेत् ।

End :

रमापतिं पूर्णगुणं मुकुन्दं
व्यासं च विज्ञानसहस्रभानुम् ।
पूर्णप्रबोधं च सुतत्त्वदीपं
क्रमाद् गुरूंश्च प्रणमामि मूर्ध्ना ॥

* * * * *

चतुर्थी सप्तमी चैव त्रयोदश्यस्तमानतः ।
अशेषमपि कुर्वीत ह्येकार्धघटिकाः स्मृताः ॥

D. No. 18192.

Pages, 2. Lines, 7 on a page. Nandinagari. Slightly injured. Extent,, 8 granthas.

शिवद्वादशनामस्तोत्रम् ।

ŚIVADVĀDAŚANĀMASTOTRAM.

Begins on fol. 15 (*a*) of the manuscript described under D. No. 18186.

A stotra or song about the 12 names of Lord Śiva and the efficacy of chanting them for washing off one's sins.

Complete.

Beginning :

प्रथमं तु महादेवं द्वितीयं तु महेश्वरम् ।
द्वितीयं शङ्करं ज्ञेयं चतुर्थं वृषभध्वजम् ॥

* * * * *

एतद् द्वादशनामानि त्रिसन्ध्यं यः पठेन्नरः ।
गोघ्नश्चैव कृतघ्नश्च भ्रूणहा गुरुतल्पगः ।
स्त्रीबालघातकश्चैव सुरापी वृषलीपतिः ॥
मुच्यते सर्वपापेभ्यो रुद्रलोकं स गच्छति ।

End :

पृथिव्या अपि महापीठमाकाशं लिङ्गमुच्यते ।
लिङ्गमध्ये जगत्सर्वं दृश्यामि परमेश्वर ॥

D. No. 18193.

Pages, 3. Lines, 7 on a page. Nandinagari. Slightly injured. Extent, 12 granthas.

दुर्गास्तवः ।

DURGĀSTAVAḤ.

Begins on fol. 15 (*b*) of the manuscript described under D. No. 18186.

Complete.

Similar to the work described under R. No. 3022 (*f*) *taken from mahabharata.*

Beginning :

धार्तराष्ट्रबलं दृष्ट्वा संग्रामे समुपस्थिते ।
अर्जुनस्य हितार्थाय कृष्णो वचनमब्रवीत् ॥

पराजयाय [शत्रूणां] दुर्गास्तोत्रमुदाहृतम् ।

अर्जुन उवाच—

नमस्ते सिद्धसेनानी राजमण्डपवासिनी ।
कुमारी कुपिता काली पिङ्गला वज्रकुण्डला ॥

च्छन्नकण्ठा नमस्तेऽस्तु वारणी वरवर्णिनी ।

सायं प्रातः पठेन्नित्यं सर्वकार्यार्थसिद्धये ।
चोरव्याघ्रभयं नास्ति मासं चापि विचिन्तयेत् ॥

दुर्गास्तोत्रमिदं पुण्यं दुर्गायास्सन्निधौ पठेत् ।
विमुक्तः सर्वपापेभ्यो दुर्गालोकं स गच्छति ॥

Colophon :

॥ दुर्गास्तोत्रं संपूर्णम् ॥

D. No. 18194.

Pages, 5. Lines, 6 on a page. Nandinagari. Slightly injured. Extent, 50 granthas.

अष्टोत्तरशतदिव्यदेशनामानि ।

ASTOTTARAŚATADIVYADEŚANĀMĀNI.

Begins on fol. 16 (*b*) of the manuscript described under D. No. 18116.

Complete.

Same work as that described under D. No. 5200 but with the addition of the following stanzas.

End :

श्रीमद्व्यासयतीन्द्रस्य पादाम्बुरुहमाश्रये ।
यस्य हृत्पङ्कजे वक्त्रपद्मे नित्यं हयाननः ॥

कीर्तयः कल्पतरवः का · · · कामधेनवः ।
कीर्तिंचिन्तामणयो व्यासतीर्थकराम्बुजे ॥

गोमानिकामध · · · वनानि सुरभूरुहाम् ।
चिन्तामणीव सनयो व्यासतीर्थकराम्बुजे (?) ॥

D. No. 18195.

Pages, 11. Lines, 6 on a page. Nandinagari. Slightly injured. Extent, 100 granthas.

तुलसीकवचः ।

TULASĪKAVACAḤ.

Begins on fol. 18 (*a*) of the manuscript described under D. No. 18186.

Complete.

From Brahmāṇḍapurāṇa.

Same work as that described under D. No. 6329.

D. No. 18196.

Pages, 10. Lines, 5 on a page. Nandinagari. Slightly injured. Extent, 46 granthas.

अष्टोत्तरशतदिव्यदेशनामानि ।

ASTOTTARAŚATADIVYADEŚANĀMĀNI.

Begins on fol. 24 (*a*) of the manuscript described under D. No. 18186.

Complete.

Same work as that described under D. No. 5200.

Fol. 28 (*b*) contains Rathasaptamiślokas.

D. No. **18197**.

Pages, 10. Lines, 6 on a page. Nandinagari. Injured. Extent, 55 granthas.

शिवकवचः ।

ŚIVAKAVACAḤ.

Begins on fol. 29 (*a*) of the manuscript described under D. No. 18186.

Complete.

From Brahmottara Khaṇḍa of Skāndapurāṇa.

Same work as that described under D. No. 7386 with some different readings in the beginning.

D. No. **18198**.

Pages, 16. Lines, 5, 6 on a page. Nandinagari. Injured. Extent, 125 granthas.

देवीपूजाविधिः ।

DEVĪPŪJĀVIDHIḤ.

Begins on fol. 34 (*a*) of the manuscript described under D. No. 18186.

Incomplete.

Contains Āvaraṇapūja, Sūryapūjā, Laksmīpūjā, Vighneśvarapūjā.

Beginning :

पूर्वद्वारे द्वारश्रियै ब्राह्म्यै परमेश्वर्यै दाक्षिणद्वारे द्वार · · · · · · पश्चिमद्वारे · · · · · इन्द्रायै उत्तरद्वारे द्वा(रश्रियै) चामुण्डायै · · · · · · · अग्रेसिंहाय, महिषाय · · · · · वास्तुपुरुषाय इति द्वारं संपूज्य—

अत्रागच्छ जगन्नाथ पूजयामि च सर्वदा ।
यावत्पूजां समाप्येत तावत्त्वं सुस्थिरो भव ॥

* * * * *

तप्तकाञ्चनसंकाशां भास्वद्रत्नसमन्विताम् ।
मुक्ताहारैः समायुक्तां ध्यायेद्देवीं चतुर्भुजाम् ॥

*　*　*　*　*

इति द्वादशावरणं संपूज्य, आसनान्यपवार्य ।

नवरत्नमये पीठे काञ्चने स्वस्तिकासने ।
उपविश्य मया दत्तां पूजां स्वीकुरु भास्कर ॥

*　*　*　*　*

विनायकेश विघ्नेश सुरासुरनरार्चित ।
अर्घ्यं स्वीकुरु देवेश भक्तप्रिय नमोऽस्तुते ॥

विनायकाय नमः । इदमर्घ्यम् ।

End :

प्रार्थये सूर्यसूनुं त्वां सर्वाभीष्टस्य सिद्धये ॥
दातव्यफलदो नित्यं सर्वदा सर्वतो मम ।

इति सूर्यसुताय प्रार्थनम् ।

D. No. 18199.

Pages, 5. Lines, 4 on a page. Nandinagari. Injured. Extent, 30 granthas.

गरुडकवचः ।

GARUḌAKAVACAḤ.

Begins on fol. 42 (*a*) of the manuscript described under D. No. 18186.

Complete.

Similar to the work described under D. No. 6149.

Beginning :

अस्य श्री गरुडब्रह्मविद्यायाः प्रजापतिः ब्रह्मा ऋषिः । अनुष्टुप् छन्दः । भगवान् श्री महाविष्णुर्गरुडो देवता । आं बीजं, स्वाहा शक्तिः, यां कीलकं, श्रीमहागरुडप्रीत्यर्थे जपे विनियोगः ।

End:

य इमां ब्रह्मविद्यामधीयानो धारयेत् । यावज्जीवं न हि सन्ति सर्पाः । य इमां ब्रह्मविद्याममावास्यायां शृणुयात् द्वादशवर्षं न हि सन्ति सर्पाः । अष्टौ ब्राह्मणाननुग्राहयित्वा तृणेन मोक्षयिष्यति । शतं ब्राह्मणाननुग्राहयित्वा चक्षुषा मोक्षयिष्यति । सहस्रं ब्राह्मणाननुग्राहयित्वा मनसा मोक्षयिष्यतीत्याह भगवान् ब्रह्मा ।

D. No. 18200.

Pages, 4. Lines, 5 in a page. Nandinagari. Injured. Extent, 26 granthas.

इन्द्राक्षीस्तोत्रम् ।

INDRĀKṢĪSTOTRAM.

Begins on fol. 44 (*b*) of the manuscript described under D. No. 18186.

Incomplete.

Same work as that described under D. No. 10713.

Fol. 46 (*a*) contains Lakṣmīpūjāvacanāni and 46 (*b*) contains Śivapūjāvacanāni.

End:

तदुपरि देव्यै नमः पीठपूजां कुर्यात् · · · · पन्तं मूलमन्त्रेण पूजयित्वा ।